Barcode : 99999990253038
Title - (1897)
Author -
Language - sanskrit
Pages - 140
Publication Year - 1897
Barcode EAN.UCC-13


श्रीः ।

अष्टाध्यायी ।

श्रीमन्महर्षि-

पाणिन्याचार्य विरचिता.

शिक्षा, परिभाषापाठ, अष्टाध्यायी, गणपाठ, धातु-
पाठ, लिङ्गानुशासनपाठ सहिता अकारा-
द्यनुक्रमावतारितसूत्रसूचीपरिष्कृता ।

सेयम्

मुम्बय्यां

खेमराज श्रीकृष्णदास इत्येतेन

स्वकीये "श्रीवेङ्कटेश्वर" मुद्रणालये

मुद्रयित्वा प्रकाशिता ।

संवत् १९५४, शके १८१९.

अत्रसर्वस्वत्त्वं यन्त्राध्यक्षस्य वशगम् ।

श्रीः ।

अथ शिक्षा ।

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा। शास्त्रानुपूर्व्यं तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥ प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः । पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥ २ ॥ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ ३ ॥ स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥४॥ अनुस्वारो विसर्गश्च ँ क ँ पौ चापि पराश्रितौ । दुःस्पृष्टश्चेति विज्ञेयो लकारः प्लुत एव च ॥ ५ ॥ १ ॥ आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ ६ ॥ मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् । मातःसवनयोगं तं छन्दोगायत्रमाश्रितम् ॥ ७ ॥ कण्ठे माध्यंदिनयुगं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥ ८ ॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः । ॥ ९ ॥ स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ १० ॥ २ ॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः । ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥ ११ ॥ उदात्ते निषादगान्धारावनुदात्ते ऋषभधैवतौ । स्वरित-प्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥१२॥अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा॥ जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥१३ ॥ ओभावश्च विवृत्तिश्च शषसा रेफ एव च । जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ १४ ॥ यद्योभावमसंधानमुकारादि-परं पदम् । स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः ॥ १५ ॥ ३ ॥ हकारं पञ्चमै-र्युक्तमन्तस्थाभिश्च संयुतम् । औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥ १६ ॥ कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू । स्युर्मूर्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥ १७ ॥ जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यौ वः स्मृतो बुधैः । एऐ तु कण्ठतालव्या-वोऔ कण्ठोष्ठजौ स्मृतौ ॥१८॥ अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् । ओका-रौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥१९॥ संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् । घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥ २० ॥ ४ ॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् । तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च ॥२१ ॥ अनुस्वार-यमानां च नासिकास्थानमुच्यते । अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ २२ ॥ अलाबुवीणानिर्घोषो दन्त्यमूल्यस्वराननु । अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः शषसेषु च ॥ २३ ॥ अनुस्वारे विवृत्यां तु विरामे चाक्षरद्वये । द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकार-वकारयोः ॥ २४ ॥ व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् । भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥ २५ ॥ ५ ॥ यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते । एवं

रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥२६ ॥ रङ्गवर्णं प्रयुञ्जीरन्नो ग्रसेत्पूर्वमक्षरम् । दीर्घस्वरं प्रयुञ्जीयात्पश्चान्नासिक्यमाचरेत् ॥२७॥ हृदये चैकमात्रस्तुअर्धमात्रस्तु मूर्धनि। नासिकायां तथार्धं च रङ्गस्यैवं द्विमात्रता ॥२८ ॥ हृदयादुत्करे तिष्ठन्कांस्येन स्वमनु-स्वरन् । मार्दवं च द्विमात्रं च जघन्वाँ इति निदर्शनम् ॥२९ ॥ मध्ये तु कम्पयेत्कम्प-मुभौ पार्श्वौ समौ भवेत् । सरङ्गं कम्पयेत्कम्पं रथीवेति निदर्शनम् ॥ ३० ॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः । सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१॥६॥ गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ ३२ ॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः । धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥ ३३॥ शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् । काकस्वरं शिरसि गतं तथा स्थानविवर्जितम् ॥ ३४ ॥ उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् । निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम् ॥ ३५ ॥ प्रातः पठेन्नित्य-मुरःस्थितेन स्वरेण शार्दूलरुतोपमेन । मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्नि-भेन ॥ ३६॥ तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् । मयूरहंसा-न्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥ ३७॥ अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरः स्मृताः । शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥ ३८॥ यमोऽनुनासिका न-ङ्यो नादिनो ह झषः स्मृताः । ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः ॥ ३९॥ ईष-च्छ्वासांश्चरो विद्याद्वोर्धामैतत्प्रचक्षते । दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि॥४०॥ छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ ४१ ॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात्साङ्गमधीत्येव ब्रह्म-लोके महीयते ॥ ४२ ॥ ८ ॥ उदात्तमाख्याति वृतोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा। उपान्तमध्ये स्वरितं धृतं च कनिष्ठिकायामनुदात्तमेव ॥ ४३ ॥ उदात्तं प्रदेशिनीं विद्या-त्प्रचयं मध्यतोऽङ्गुलिम् । निहतं तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥४४ ॥ अन्तो-दात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् । मध्योदात्तं स्वरितं ह्युदात्तं त्र्युदात्तमिति नवपदश्रेण्या ॥४५॥ अग्निः सोमः प्र वो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्रावृहस्पती । अग्नि-रित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम् ॥ ४६ ॥ हविषां मध्योदात्तं स्व रिति स्वरितम् । बृहस्पतिरिति द्व्युदात्तमिन्द्रावृहस्पती इति त्र्यु-दात्तम् ॥४७ ॥ अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः। स्वरितः कर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥ ४८ ॥ ९ ॥ चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः । शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥ ४९ ॥ कुतीर्थादागतं दग्धमपवर्णं च भाक्षितम् । न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥५० ॥ सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् । सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१ ॥ मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वर-

तोपराधात् ॥ ५२ ॥ अवक्षरं हनायुष्यं विस्वरं व्याधिपीडितम् । अक्षताशस्त्ररूपेण वज्रं पतति मस्तके ॥ ५३॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्। ऋग्यजुःसाम-भिर्दग्धो वियोनिमधिगच्छति ॥५४॥हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् । ऋग्यजुः-सामभिः पूतो ब्रह्मलोके महीयते ॥ ५५॥ १०॥ शंकरः शांकरीं मादाद्दाक्षीपुत्राय धीमते । वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ ५६ ॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ ५७ ॥ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः । तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ ५८ ॥ अज्ञानान्ध-स्य लोकस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥ ५९ ॥ त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः । स भवति धनधान्यपशु-पुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीतिदिवीति ॥६०॥ ११ ॥ अथ शिक्षामात्मोदा-त्तश्च हकारं स्वराणां यथागीत्यचोस्पृष्टोदात्तं चाषस्तु शंकर एकादश ॥इति शिक्षा॥

श्रीः ।

अथ परिभाषापाठः ।

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥ १ ॥ यथोद्देशं संज्ञापरिभाषम् ॥ कार्यकालं संज्ञापरिभाषम् ॥ अनेकान्ता (एकान्ताः) अनुबन्धाः ॥ नानुबन्धकृतमनेकाल्त्वम् ॥ नानुबन्धकृतमनेजन्तत्वम् ॥ नानुबन्धकृतमसारूप्यम् ॥ उभयगतिरिह भवति ॥ कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते ॥ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ निर्दिश्यमानस्यादेशा भवन्ति ॥ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ॥ अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् ॥ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥ एकयोगनिर्दिष्टानां सह वा प्रवृत्तिस्सह वा निवृत्तिः ॥ एकयोगनिर्दिष्टानां क्वचिदेकदेशोऽप्यनुवर्तते ॥ भाव्यमानेन सवर्णानां ग्रहणं न ॥ भाव्यमानोऽप्युकारस्सवर्णान् गृह्णाति ॥ वर्णाश्रये नास्ति प्रत्ययलक्षणम् ॥ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ प्रत्ययग्रहणे चापञ्चम्याः ॥ उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् ॥ स्त्रीप्रत्यये चानुपसर्जने न ॥ संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ पदाङ्गाधिकारे तस्य च तदन्तस्य ॥ व्यपदेशिवदेकस्मिन् निमित्तसद्भावात् ॥ ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ॥ व्यपदेशिवद्भावोऽप्रातिपदिके न ॥ यस्मिन्विधिस्तदादावल्ग्रहणे ॥ सर्वो द्वन्द्वो विभाषैकवद्भवति ॥ सर्वे विधयश्छन्दसि विकल्प्यन्ते ॥ प्रकृतिवदनुकरणं भवति ॥ एकदेशविकृतमनन्यवत् ॥ पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ॥ पुनःप्रसङ्गविज्ञानात्सिद्धम् ॥ सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ विकरणेभ्यो नियमो बलीयान् ॥ परान्नित्यं बलवत् ॥ शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति ॥ शब्दान्तरात्प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम् ॥ लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ॥ क्वचित्कृताकृतप्रसङ्गमात्रेणापि नित्यता ॥ यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् ॥ यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम् ॥ स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यः ॥ असिद्धं बहिरङ्गमन्तरङ्गे ॥ नाजानन्तर्ये बहिष्ट्वप्रकृतिः ॥ अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते ॥ पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न ॥ अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते ॥ वार्णादांङ्गं बलीयो भवति ॥ अकृतव्यूहाः पाणिनीयाः ॥ अन्तरङ्गादपवादो बलीयान् ॥ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ॥

क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ॥ पुरस्तादपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान् ॥ मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरान् ॥ अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति ॥ पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ॥ प्रकल्प्य चापवादविषयं ततउत्सर्गोऽभिनिविशते ॥ उपसंजनिष्यमाणनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधत इति॥अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते॥अभ्यासविकारेषु बाध्यबाधकभावो नास्ति॥ताच्छीलिकेषु वासरूपविधिर्नास्ति ॥ तृल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ॥ लादेशेषु वासरूपविधिर्नास्ति ॥ उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्॥प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ॥ विभक्तौ लिङ्गविशिष्टाग्रहणम् ॥ सूत्रे लिङ्गवचनमतन्त्रम्॥ नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः॥गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः ॥ सांप्रतिकाभावे भूतपूर्वगतिः ॥ बहुव्रीहौ तद्गुणसंविज्ञानमपि ॥ चानुकृष्टं नोत्तरत्र ॥ स्वरविधौ व्यञ्जनमविद्यमानवत् ॥ हलन्तस्वरमात्रौ व्यञ्जनमविद्यमानवत् ॥ निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम् ॥ तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणम्॥क्वचित्स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ॥ समासान्तविधिरनित्यः ॥ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य ॥ सांनियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ॥ ताच्छीलिके णेऽणकृतानि भवन्ति ॥ धातोः कार्यमुच्यमानं तत्प्रत्यये भवति ॥ तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ लुग्विकरणालुग्विकरणयोर्लुग्विकरणस्य ॥ प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम् ॥ अङ्गवृत्ते पुनर्वृत्ताविधिः ॥ संज्ञापूर्वकविधेरनित्यत्वम् ॥ आगमशास्त्रमनित्यम् ॥ गणकार्यमनित्यम् ॥ अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ॥ नञ्घटितमनित्यम् ॥ आतिदेशिकमनित्यम् ॥ सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ॥ प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ विधौ परिभाषोपतिष्ठते नानुवादे ॥ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ अन्त्यविकारेऽन्त्यसदेशस्य ॥ नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे ॥ प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः ॥ अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ विधिनियमसंभवे विधिरेव ज्यान् ॥ सामान्यातिदेशे विशेषानातिदेशः ॥ प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणम् ॥ सहचरितासहचरितयोस्सहचरितस्यैव ग्रहणम् ॥ श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान् ॥ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ गामादाग्रहणेष्वविशेषः ॥ प्रत्येकं वाक्यपरिसमाप्तिः ॥ क्वचित्समुदायेऽपि ॥ अभेदका गुणाः ॥ बाधकान्येव तु निपातनानि ॥ पर्जन्यवल्लक्षणप्रवृत्तिः ॥ लक्ष्ये लक्षणं सकृदेव प्रवर्तते ॥ निषेधाश्च

वलीयांसः ॥ अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥ योगविभागादिष्टसिद्धिः ॥ पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते ॥ ज्ञापकसिद्धं न सर्वत्र ॥ पूर्वत्रासिद्धीयमाद्वित्वे ॥ एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति ॥ संप्रसारणं तदाश्रयं च कार्यं बलवत् ॥ क्वचिद्विकृतिः प्रकृतिं गृह्णाति॥ औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ स्तिपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च ॥ यत्रैकाल्यग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ पदगौरवाद्योगविभागो गरीयान् ॥ अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ॥

इति परिभाषापाठः समाप्तः ॥ शुभं भूयाद् ॥

श्रीः ।

पाणिनीयसूत्राऽष्टाध्यायी ।

श्रीगणेशाय नमः ।

प्रथमोऽध्यायः ।

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ॥
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ १ ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ॥
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ २ ॥

अइउण् १ ऋऌक् २ एओङ् ३ ऐऔच् ४ हयवरट् ५ लण् ६ ञमङणनम् ७ झभञ् ८ घढधष् ९ जबगडदश् १० खफछठथचटतव् ११ कपय् २२ शषसर् १३ हल् १४ इति प्रत्याहारसूत्राणि ।

सूत्राणि ।	अ० पा० सू०	सूत्राणि ।	अ० पा० सू०
वृद्धिरादैच्	१ । १ । १	उञः	१ । १ । १७
अदे ङ्गुणः	१ । १ । २	ऊँ	१ । १ । १८
इको गुणवृद्धी	१ । १ । ३	ईदूतौ च सप्तम्यर्थे	१ । १ । १९
न धातुलोप आर्धधातुके	१ । १ । ४	दा धा घ्वदाप्	१ । १ । २०
क्ङिति च	१ । १ । ५	आद्यन्तवदेकस्मिन्	१ । १ । २१
दीधीवेवीटाम्	१ । १ । ६	तरप्तमपौ घः	१ । १ । २२
हलोऽनन्तराः संयोगः	१ । १ । ७	बहुगणवतुडति संख्या	१ । १ । २३
मुखनासिकावचनोऽनुनासिकः	१ । १ । ८	ण्णान्ता षट्	१ । १ । २४
तुल्यास्यप्रयत्नं सवर्णम्	१ । १ । ९	ङति च	१ । १ । २५
नाऽज्झलौ	१ । १ । १०	क्तक्तवतू निष्ठा	१ । १ । २६
ईदूदेद्विवचनं प्रगृह्यम्	१ । १ । ११	सर्वादीनि सर्वनामानि	१ । १ । २७
अदसो मात्	१ । १ । १२	विभाषा दिक्समासे बहुव्रीहौ	१ । १ । २८
शे	१ । १ । १३	न बहुव्रीहौ	१ । १ । २९
निपात एकाजनाङ्	१ । १ । १४	तृतीयासमासे	१ । १ । ३०
ओत्	१ । १ । १५	द्वन्द्वे च	१ । १ । ३१
सम्बुद्धौ शाकल्यस्येतावनार्षे	१ । १ । १६	विभाषा जसि	१ । १ । ३२

सूत्राणि ।	अ० पा० सू०
प्रथमचरमतयाल्पार्धकतिपयने-	
माश्च	१ । १ । ३३
पूर्वपरावरदक्षिणोत्तरापरा-	
राणि व्यवस्थायामसंज्ञायाम्	१ । १ । ३४
स्वमज्ञातिधनाख्यायाम्	१ । १ । ३५
अन्तरं बहिर्योगोपसंव्यानयोः	१ । १ । ३६
स्वरादिनिपातमव्ययम्	१ । १ । ३७
तद्धितश्चासर्वविभक्तिः	१ । १ । ३८
कृन्मेजन्तः	१ । १ । ३९
क्त्वातोसुन्कसुनः	१ । १ । ४०
अव्ययीभावश्च	१ । १ । ४१
शि सर्वनामस्थानम्	१ । १ । ४२
सुडनपुंसकस्य	१ । १ । ४३
नवेति विभाषा	१ । १ । ४४
इग्यणः सम्प्रसारणम्	१ । १ । ४५
आद्यन्तौ टकितौ	१ । १ । ४६
मिदचोन्त्यात्परः	१ । १ । ४७
एच इग्घ्रस्वादेशे	१ । १ । ४८
षष्ठी स्थानेयोगा	१ । १ । ४९
स्थानेऽन्तरतमः	१ । १ । ५०
उरण् रपरः	१ । १ । ५१
अलोन्त्यस्य	१ । १ । ५२
ङिच्च	१ । १ । ५३
आदेः परस्य	१ । १ । ५४
अनेकाल्शित्सर्वस्य	१ । १ । ५५
स्थानिवदादेशोऽनल्विधौ	१ । १ । ५६
अचः परस्मिन्पूर्वविधौ	१ । १ । ५७
न पदान्तद्विर्वचनवरेयलो-	
यस्वरसवर्णाऽनुस्वार-	
दीर्घजश्चींवधिषु	१ । १ । ५८

सूत्राणि ।	अ० पा० सू०
द्विर्वचनेऽचि	१ । १ । ५९
अदर्शनं लोपः	१ । १ । ६०
प्रत्ययस्य लुक्श्लुलुपः	१ । १ । ६१
प्रत्ययलोपे प्रत्ययलक्षणम्	१ । १ । ६२
न लुमताङ्गस्य	१ । १ । ६३
अचोऽन्त्यादि टि	१ । १ । ६४
अलोन्त्यात्पूर्व उपधा	१ । १ । ६५
तस्मिन्निति निर्दिष्टे पूर्वस्य	१ । १ । ६६
तस्मादित्युत्तरस्य	१ । १ । ६७
स्वं रूपं शब्दस्याऽशब्दसंज्ञा	१ । १ । ६८
अणुदित्सवर्णस्य चाऽप्रत्ययः	१ । १ । ६९
तपरस्तत्कालस्य	१ । १ । ७०
आदिरन्त्येन सहेता	१ । १ । ७१
येन विधिस्तदन्तस्य	१ । १ । ७२
वृद्धिर्यस्याचामादिस्तद्वृद्धम्	१ । १ । ७३
त्यदादीनि च	१ । १ । ७४
एङ् प्राचांदेशे	१ । १ । ७५
वृद्धिरादैच्	
आद्यन्तवदव्ययीभावः	
प्रत्ययस्यलुक्श्लुपश्चदश ॥ इति	
प्रथमाध्यायस्य प्रथमः पादः ॥ १ ॥	
गाङ्कुटादिभ्योऽञ्णिन्ङित्	१ । २ । १
विङ इट्	१ । २ । २
विभाषोर्णोः	१ । २ । ३
सार्वधातुकमपित्	१ । २ । ४
असंयोगाल्लिट्कित्	१ । २ । ५
इन्धिभवतिभ्यां च	१ । २ । ६
मृडमृदगुधकुषक्लिशवदवसः क्त्वा	१ । २ । ७
रुदविदमुषग्रहिस्वपिप्रच्छः संश्च	१ । २ । ८
इको झल्	१ । २ । ९
हलन्ताच्च	१ । २ । १०

सूत्राणि ।	अ० पा० सू०
लिङ्सिचावात्मनेपदेषु	१ । २ । ११
उश्च	१ । २ । १२
वा गमः	१ । २ । १३
हनः सिच्	१ । २ । १४
यमो गन्धने	१ । २ । १५
विभाषोपयमने	१ । २ । १६
स्थाध्वोरिच्च	१ । २ । १७
नक्त्वा सेट्	१ । २ । १८
निष्ठा शीङ्स्विदिमिदिक्ष्वि-दिधृषः	१ । २ । १९
मृषस्तितिक्षायाम्	१ । २ । २०
उदुपधाद्भावादिकर्मणोरन्यतरस्याम्	१ । २ । २१
पूङः क्त्वा च	१ । २ । २२
नोपधात्थफान्ताद्वा	१ । २ । २३
वञ्चिलुञ्च्यृतश्च	१ । २ । २४
तृषिमृषिकृशेः काश्यपस्य	१ । २ । २५
रलोव्युपधाद्धलादेः संश्च	१ । २ । २६
ऊकालोऽज्झ्रस्वदीर्घप्लुतः	१ । २ । २७
अचश्च	१ । २ । २८
उच्चैरुदात्तः	१ । २ । २९
नीचैरनुदात्तः	१ । २ । ३०
समाहारः स्वरितः	१ । २ । ३१
तस्यादित उदात्तमर्धह्रस्वम्	१ । २ । ३२
एकश्रुतिदूरात्सम्बुद्धौ	१ । २ । ३३
यज्ञकर्मण्यजपन्यूंखसामसु	१ । २ । ३४
उच्चैस्तरां वा वषट्कारः	१ । २ । ३५
विभाषा छन्दसि	१ । २ । ३६

सूत्राणि ।	अ० पा० सू०
न सुब्रह्मण्यायां स्वरितस्य तूदात्तः	१ । २ । ३७
देवब्रह्मणोरनुदात्तः	१ । २ । ३८
स्वरितात्संहितायामनुदात्तानाम्	१ । २ । ३९
उदात्तस्वरितपरस्य सन्नतरः	१ । २ । ४०
अपृक्त एकाल् प्रत्ययः	१ । २ । ४१
तत्पुरुषः समानाधिकरणः कर्मधारयः	१ । २ । ४२
प्रथमानिर्दिष्टं समास उपसर्जनम्	१ । २ । ४३
एकविभक्तिचापूर्वनिपाते	१ । २ । ४४
अर्थवदधातुरप्रत्ययः प्रातिपदिकम्	१ । २ । ४५
कृत्तद्धितसमासाश्च	१ । २ । ४६
ह्रस्वो नपुंसके प्रातिपदिकस्य	१ । २ । ४७
गोस्त्रियोरुपसर्जनस्य	१ । २ । ४८
लुक् तद्धितलुकि	१ । २ । ४९
इद्गोण्याः	१ । २ । ५०
लुपि युक्तवद्व्यक्तिवचने	१ । २ । ५१
विशेषणानां चाऽजातेः	१ । २ । ५२
तदशिष्यं संज्ञाप्रमाणत्वात्	१ । २ । ५३
लुब्योगाऽप्रख्यानात्	१ । २ । ५४
योगप्रमाणे च तदभावेऽदर्शनं स्यात्	१ । २ । ५५
प्रधानप्रत्ययार्थवचनमर्थस्याऽन्यप्रमाणत्वात्	१ । २ । ५६
कालोपसर्जने च तुल्यम्	१ । २ । ५७

सूत्राणि।	अ० पा० सू०
जात्याख्यायामेकस्मिन् बहुवचनम-	
न्यतरस्याम्	१। २। ५८
अस्मदो द्वयोश्च	१। २। ५९
फल्गुनीप्रोष्ठपदानां च नक्षत्रे	१। २। ६०
छन्दसि पुनर्वस्वोरेकवचनम्	१। २। ६१
विशाखयोश्च	१। २। ६२
तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहु-	
वचनस्य द्विवचनं नित्यम्	१। २। ६३
सरूपाणामेकशेष एकविभक्तौ	१। २। ६४
वृद्धो यूना तल्लक्षणश्चेदेव	
विशेषः	१। २। ६५
स्त्रीपुंवच्च	१। २। ६६
पुमान् स्त्रिया	१। २। ६७
भ्रातृपुत्रौ स्वसृदुहितृभ्याम्	१। २। ६८
नपुंसकमनपुंसकेनैकवच्चास्यान्यतर-	
स्याम्	१। २। ६९
पिता मात्रा	१। २। ७०
श्वशुरः श्वश्रवा	१। २। ७१
त्यदादीनि सर्वैर्नित्यम्	१। २। ७२
ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री	१। २। ७३
गाङ्कुटादिभ्यो ञ्णिन्ङित्। धादयो धातवः। वृत्तिसर्गतायनेषु क्रमः। भ्वादयः। सत्तायां विद्यमानाः। चादयोऽसत्त्वे। प्रादयः। अन्तर्धौ येनादर्शनमिच्छति। उपसर्गाः क्रियायोगे। गतिश्च। कर्मप्रवचनीयाः। क्रियाविशेषकाणामाद्युदात्तत्वं वक्तव्यम्। निपाता आद्युदात्ताः। आमन्त्रितं पूर्वमविद्यमानवत्। अनुदात्तं सर्वमपादादौ। तिङि चोदात्तवति। फिषोऽन्तोदात्तः। गतिकारकोपपदात्कृत्। कृत्स्वरः। तद्धितेष्वचामादेः। शेषे विभाषा। षष्ठीसमासेषु प्रत्ययस्वरेण समासस्वरं बाधित्वा पूर्वपदप्रकृतिस्वरत्वं वक्तव्यम्। ङ्यापोः संज्ञाछन्दसोर्बहुलम्। ङिच्च। चितः। कृदिकारादक्तिनः। फक्फिञोरन्यतरस्याम्। किदाशिषि। आदिर्ञिटुडवः। षः प्रत्ययस्य। चुटू। लशकतद्धिते। तस्य लोपः। यथासंख्यमनुदेशः समानाम्। स्वरितेनाधिकारः। अनुदात्तङित आत्मनेपदम्। भावकर्मणोः। कर्तरि कर्मव्यतिहारे। न गतिहिंसार्थेभ्यः। इतरेतरान्योन्योपपदाच्च। नेर्विशः। परिव्यवेभ्यः क्रियः। विपराभ्यां जेः। आङोदोऽनास्यविहरणे। क्रीङोऽनुसम्परिभ्यश्च। समवप्रविभ्यः स्थः। प्रकाशनस्थेयाख्ययोश्च। उदोऽनूर्ध्वकर्मणि। उपान्मन्त्रकरणे। अकर्मकाच्च। उद्विभ्यां तपः। आङो यमहनः	१। ३। १
इत्यष्टादश ॥	
॥इति प्रथमाऽध्यायस्य द्वितीयः पादः॥२॥	
भूवादयो धातवः	१। ३। १
उपदेशेऽजनुनासिक इत्	१। ३। २
हलन्त्यम्	१। ३। ३
न विभक्तौ तुस्माः	१। ३। ४

सूत्राणि ।	अ० पा० सू०
समो गम्यृच्छिभ्याम्	१ । ३ । २९
निसमुपविभ्यो ह्वः	१ । ३ । ३०
स्पर्धायामाङः	१ । ३ । ३१
गन्धनावक्षेपणसेवन-साहसिक्यमतियत्नप्रक-थनोपयोगेषु कृञः	१ । ३ । ३२
अधेः प्रसहने	१ । ३ । ३३
वेः शब्दकर्मणः	१ । ३ । ३४
अकर्मकाच्च	१ । ३ । ३५
सम्माननोत्सञ्जनाचार्यक-रणज्ञानभृतिविगणनव्य-येषु नियः	१ । ३ । ३६
कर्तृस्थे चाशरीरे कर्मणि	१ । ३ । ३७
वृत्तिसर्गतायनेषु क्रमः	१ । ३ । ३८
उपपराभ्याम्	१ । ३ । ३९
आङ् उद्गमने	१ । ३ । ४०
वेः पादविहरणे	१ । ३ । ४१
प्रोपाभ्यां समर्थाभ्याम्	१ । ३ । ४२
अनुपसर्गाद्वा	१ । ३ । ४३
अपह्नवे ज्ञः	१ । ३ । ४४
अकर्मकाच्च	१ । ३ । ४५
सम्प्रतिभ्यामनाध्याने	१ । ३ । ४६
भासनोपसम्भाषाज्ञा-नयत्नविमत्युपमन्त्रणेषु वदः	१ । ३ । ४७
व्यक्तवाचां समुच्चारणे	१ । ३ । ४८
अनोरकर्मकात्	१ । ३ । ४९
विभाषा विप्रलापे	१ । ३ । ५०
अवाद्रुः	१ । ३ । ५१
समः प्रतिज्ञाने	१ । ३ । ५२
उदश्चरः सकर्मकात्	१ । ३ । ५३

सूत्राणि ।	अ० पा० सू०
समस्तृतीयायुक्तात्	१ । ३ । ५४
दाणश्च सा चेच्चतुर्थ्यर्थे	१ । ३ । ५५
उपाद्यमः स्वकरणे	१ । ३ । ५६
ज्ञाश्रुस्मृदृशां सनः	१ । ३ । ५७
नानोर्ज्ञः	१ । ३ । ५८
प्रत्याङ्भ्यां श्रुवः	१ । ३ । ५९
शदेः शितः	१ । ३ । ६०
म्रियतेर्लुङ्लिङोश्च	१ । ३ । ६१
पूर्ववत्सनः	१ । ३ । ६२
आम्प्रत्ययवत्कृञोऽनुप-योगस्य	१ । ३ । ६३
प्रोपाभ्यां युजेरयज्ञपा-त्रेषु	१ । ३ । ६४
समः क्ष्णुवः	१ । ३ । ६५
भुजोऽनवने	१ । ३ । ६६
णेरणौ यत्कर्मणौ चेत्स कर्ताऽनाध्याने	१ । ३ । ६७
भीस्म्योर्हेतुभये	१ । ३ । ६८
गृधिवञ्च्योः प्रलम्भने	१ । ३ । ६९
लियः संमाननशालीनीकरणयोश्च	१ । ३ । ७०
मिथ्योपपदात्कृञोऽभ्यासे	१ । ३ । ७१
स्वरितञितः कर्त्रभिप्राये क्रियाफले	१ । ३ । ७२
अपाद्वदः	१ । ३ । ७३
णिचश्च	१ । ३ । ७४
समुदाङ्भ्यो यमोऽग्रन्थे	१ । ३ । ७५
अनुपसर्गाज्ज्ञः	१ । ३ । ७६

सूत्राणि।	अ० पा० सू०
विभाषोपपदेन प्रतीय-माने	१ । ३ । ७७
शेषात्कर्तरि परस्मै-पदम्	१ । ३ । ७८
अनुपराभ्यां कृञः	१ । ३ । ७९
अभिप्रत्यतिभ्यः क्षिपः	१ । ३ । ८०
प्राद्वहः	१ । ३ । ८१
परेर्मृषः	१ । ३ । ८२
व्याङ्परिभ्यो रमः	१ । ३ । ८३
उपाच्च	१ । ३ । ८४
विभाषाऽकर्मकाद्	१ । ३ । ८५
बुधयुधनशजनेङ्भुद्रु-स्रुभ्यो णेः	१ । ३ । ८६
निगरणचलनार्थेभ्यश्च	१ । ३ । ८७
अणावकर्मकाच्चित्तव-त्कर्तृकात्	१ । ३ । ८८
न पादम्याङ्यमाङ्यसप-रिमुहरुचिनृतिवदवसः	१ । ३ । ८९
वा क्यषः	१ । ३ । ९०
द्रुद्रुभ्यो लुङि	१ । ३ । ९१
वृद्भ्यः स्यसनोः	१ । ३ । ९२
लुटि च क्लृपः	१ । ३ । ९३
भूवादयः क्रीङोनुवेःपादम्नियतेः प्राद्वह-स्त्रयोदश ॥ इति प्रथमाध्यायस्य तृती-यः पादः ॥ ३ ॥	
आकडारादेका संज्ञा	१ । ४ । १
विप्रतिषेधे परं कार्यम्	१ । ४ । २
यूस्त्र्याख्यौ नदी	१ । ४ । ३
नेयङुवङ्स्थानावस्त्री	१ । ४ । ४
वामि	१ । ४ । ५
ङिति ह्रस्वश्च	१ । ४ । ६

सूत्राणि।	अ० पा० सू०
शेषो घ्यसखि	१ । ४ । ७
पतिः समास एव	१ । ४ । ८
षष्ठीयुक्तश्छन्दसि वा	१ । ४ । ९
ह्रस्वं लघु	१ । ४ । १०
संयोगे गुरु	१ । ४ । ११
दीर्घं च	१ । ४ । १२
यस्मात्प्रत्ययविधिस्त-दादिप्रत्ययेऽङ्गम्	१ । ४ । १३
सुप्तिङन्तं पदम्	१ । ४ । १४
नः क्ये	१ । ४ । १५
सिति च	१ । ४ । १६
स्वादिष्वसर्वनामस्थाने	१ । ४ । १७
यचि भम्	१ । ४ । १८
तसौ मत्वर्थे	१ । ४ । १९
अयस्मयादीनि च्छन्दसि	१ । ४ । २०
बहुषु बहुवचनम्	१ । ४ । २१
द्व्येकयोर्द्विवचनैकवचने	१ । ४ । २२
कारके	१ । ४ । २३
ध्रुवमपायेऽपादानम्	१ । ४ । २४
भीत्रार्थानां भयहेतुः	१ । ४ । २५
पराजेरसोढः	१ । ४ । २६
वारणार्थानामीप्सितः	१ । ४ । २७
अन्तर्धौ येनादर्शनमि-च्छति	१ । ४ । २८
आख्यातोपयोगे	१ । ४ । २९
जनिकर्तुः प्रकृतिः	१ । ४ । ३०
भुवः प्रभवः	१ । ४ । ३१
कर्मणा यमभिप्रैति स संप्रदानम्	१ । ४ । ३२
रुच्यर्थानां प्रीयमाणः	१ । ४ । ३३
श्लाघह्नुङ्स्थाशपां ज्ञी-	

सूत्राणि ।	अ० पा० सू०
प्स्यमानः	१ । ४ । ३४
धारेरुत्तमर्णः	१ । ४ । ३५
स्पृहेरीप्सितः	१ । ४ । ३६
क्रुधद्रुहेर्ष्यासूयार्थानां यं मति कोपः	१ । ४ । ३७
क्रुधद्रुहोरुपसृष्टयोः कर्म	१ । ४ । ३८
राधीक्ष्योर्यस्य विप्रश्नः	१ । ४ । ३९
मत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता	१ । ४ । ४०
अनुप्रतिगृणश्च	१ । ४ । ४१
साधकतमं करणम्	१ । ४ । ४२
दिवः कर्म च	१ । ४ । ४३
परिक्रयणे संप्रदानमन्यतरस्याम्	१ । ४ । ४४
आधारोऽधिकरणम्	१ । ४ । ४५
अधिशीङ्स्थासां कर्म	१ । ४ । ४६
अभिनिविशश्च	१ । ४ । ४७
उपान्वध्याङ्वसः	१ । ४ । ४८
कर्तुरीप्सिततमं कर्म	१ । ४ । ४९
तथायुक्तं चानीप्सितम्	१ । ४ । ५०
अकथितं च	१ । ४ । ५१
गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ	१ । ४ । ५२
हृक्रोरन्यतरस्याम्	१ । ४ । ५३
स्वतन्त्रः कर्त्ता	१ । ४ । ५४
तत्प्रयोजको हेतुश्च	१ । ४ । ५५
प्राग्रीश्वरान्निपाताः	१ । ४ । ५६
चादयोऽसत्त्वे	१ । ४ । ५७
प्रादयः	१ । ४ । ५८
उपसर्गाः क्रियायोगे	१ । ४ । ५९

सूत्राणि ।	अ० पा० सू०
गतिश्च	१ । ४ । ६०
ऊर्यादिच्विडाचश्च	१ । ४ । ६१
अनुकरणं चानितिपरम्	१ । ४ । ६२
आदरानादरयोः सदसती	१ । ४ । ६३
भूषणेऽलम्	१ । ४ । ६४
अन्तरपरिग्रहे	१ । ४ । ६५
कर्णेमनसी श्रद्धामतीघाते	१ । ४ । ६६
पुरोऽव्ययम्	१ । ४ । ६७
अस्तं च	१ । ४ । ६८
अच्छ गत्यर्थवदेषु	१ । ४ । ६९
अदोनुपदेशे	१ । ४ । ७०
तिरोऽन्तर्धौ	१ । ४ । ७१
विभाषा कृञि	१ । ४ । ७२
उपाजेऽन्वाजे	१ । ४ । ७३
साक्षात्प्रभृतीनि च	१ । ४ । ७४
अनत्याधान उरसिमनसी	१ । ४ । ७५
मध्येपदेनिवचने च	१ । ४ । ७६
नित्यं हस्ते पाणावुपयमने	१ । ४ । ७७
प्राध्वं बन्धने	१ । ४ । ७८
जीविकोपनिषदावौपम्ये	१ । ४ । ७९
ते प्राग्धातोः	१ । ४ । ८०
छन्दसि परेऽपि	१ । ४ । ८१
व्यवहिताश्च	१ । ४ । ८२
कर्मप्रवचनीयाः	१ । ४ । ८३
अनुर्लक्षणे	१ । ४ । ८४
तृतीयार्थे	१ । ४ । ८५
हीने	१ । ४ । ८६
उपोऽधिके च	१ । ४ । ८७
अपपरी वर्जने	१ । ४ । ८८
आङ् मर्यादावचने	१ । ४ । ८९

सूत्राणि ।	अ० पा० सू०
लक्षणेत्थंभूताख्यानभा-	
गवीप्सासु मतिपर्यनवः	१ । ४ । ९०
अभिरभागे	१ । ४ । ९१
मतिः मतिनिधिमतिदा-	
नयोः	१ । ४ । ९२
अधिपरी अनर्थकौ	१ । ४ । ९३
सुः पूजायाम्	१ । ४ । ९४
अतिरतिक्रमणे च	१ । ४ । ९५
अपिः पदार्थसंभावना-	
ऽन्ववसर्गगर्हासमुच्चयेषु	१ । ४ । ९६
अधिरीश्वरे	१ । ४ । ९७
विभाषा कृञि	१ । ४ । ९८
लः परस्मैपदम्	१ । ४ । ९९
तङानावात्मनेपदम्	१ । ४ । १००
तिङस्त्रीणित्रीणि प्रथ-	
ममध्यमोत्तमाः	१ । ४ । १०१
तान्येकवचनद्विवचन-	
बहुवचनान्येकशः	१ । ४ । १०२
सुपः	१ । ४ । १०३
विभक्तिश्च	१ । ४ । १०४
युष्मद्युपपदे समानाधि-	
करणे स्थानिन्यपि मध्यमः	१ । ४ । १०५
प्रहासे च मन्योपपदे म-	
न्यतेरुत्तम एकवच्च	१ । ४ । १०६
अस्मद्युत्तमः	१ । ४ । १०७
शेषे प्रथमः	१ । ४ । १०८
परः सन्निकर्षः संहिता	१ । ४ । १०९
विरामोऽवसानम्	१ । ४ । ११०
आकडारादेका संज्ञा	
सिद्धे सत्यारभ्यमाणा	
विधिर्नियमाय वा	
पक्षे तत्रोदात्तवच्चेति	
तिङोदश ॥ इति प्रथमाध्यायस्य चतुर्थः	
पादः ॥ प्रथमाध्यायः समाप्तः ॥ १ ॥	

सूत्राणि ।	अ० पा० सू०
अथ द्वितीयाध्यायप्रारंभः ।	
समर्थः पदविधिः	२ । १ । १
सुबामन्त्रिते पराङ्गवत्स्वरे	२ । १ । २
प्राक्कडारात्समासः	२ । १ । ३
सह सुपा	२ । १ । ४
अव्ययीभावः	२ । १ । ५
अव्ययं विभक्तिसमीपस-	
मृद्धिव्यृद्ध्यर्थाभावात्यया-	
सम्प्रतिशब्दप्रादुर्भावपश्चा-	
द्यथानुपूर्व्ययौगपद्यसादृ-	
श्यसम्पत्तिसाकल्यान्त-	
वचनेषु	२ । १ । ६
यथाऽसादृश्ये	२ । १ । ७
यावदवधारणे	२ । १ । ८
सुप् प्रतिना मात्रार्थे	२ । १ । ९
अक्षशलाकासंख्याः परिणा	२ । १ । १०
विभाषा	२ । १ । ११
अपपरिवहिरञ्चवः प-	
ञ्चम्या	२ । १ । १२
आङ् मर्यादाभिविध्योः	२ । १ । १३
लक्षणेनाभिप्रती आभि-	
मुख्ये	२ । १ । १४
अनुर्यत्समया	२ । १ । १५
यस्य चायामः	२ । १ । १६
तिष्ठद्गुप्रभृतीनि च	२ । १ । १७
पारे मध्ये षष्ठ्या वा	२ । १ । १८
संख्या वंश्येन	२ । १ । १९

सूत्राणि।	अ० पा० सू०
नदीभिश्च	२। १। २०
अन्यपदार्थे च संज्ञायाम्	२। १। २१
तत्पुरुषः	२। १। २२
द्विगुश्च	२। १। २३
द्वितीया श्रितातीतपतितग-	
तात्यस्तप्राप्तापन्नैः	२। १। २४
स्वयं क्तेन	२। १। २५
खट्वा क्षेपे	२। १। २६
सामि	२। १। २७
कालाः	२। १। २८
अत्यन्तसंयोगे च	२। १। २९
तृतीया तत्कृतार्थेन गुणवच-	
नेन	२। १। ३०
पूर्वसदृशसमोनार्थकलह-	
निपुणमिश्रश्लक्ष्णैः	२। १। ३१
कर्तृकरणे कृता बहुलम्	२। १। ३२
कृत्यैराधिकार्थवचने	२। १। ३३
अन्नेन व्यञ्जनम्	२। १। ३४
भक्ष्येण मिश्रीकरणम्	२। १। ३५
चतुर्थी तदर्थार्थबलिहित-	
सुखरक्षितैः	२। १। ३६
पञ्चमी भयेन	२। १। ३७
अपेतापोढमुक्तपतिता-	
पत्रस्तैरल्पशः	२। १। ३८
स्तोकान्तिकदूरार्थकृच्छ्रा-	
णि क्तेन	२। १। ३९
सप्तमी शौण्डैः	२। १। ४०
सिद्धशुष्कपक्वबन्धैश्च	२। १। ४१
ध्वाङ्क्षेण क्षेपे	२। १। ४२
कृत्यैर्ऋणे	२। १। ४३
संज्ञायाम्	२। १। ४४

सूत्राणि।	अ० पा० सू०
क्तेनाहोरात्रावयवाः	२। १। ४५
तत्र	२। १। ४६
क्षेपे	२। १। ४७
पात्रेसमितादयश्च	२। १। ४८
पूर्वकालैकसर्वजरत्पुराणनव-	
केवलाः समानाधिकरणेन	२। १। ४९
दिक्संख्ये संज्ञायाम्	२। १। ५०
तद्धितार्थोत्तरपदसमाहारे च	२। १। ५१
संख्यापूर्वो द्विगुः	२। १। ५२
कुत्सितानि कुत्सनैः	२। १। ५३
पापाणके कुत्सितैः	२। १। ५४
उपमानानि सामान्यवचनैः	२। १। ५५
उपमितं व्याघ्रादिभिः सामा-	
न्याप्रयोगे	२। १। ५६
विशेषणं विशेष्येण बहुलम्	२। १। ५७
पूर्वापरप्रथमचरमजघ-	
न्यसमानमध्यमध्यमवी-	
राश्च	२। १। ५८
श्रेण्यादयः कृतादिभिः	२। १। ५९
क्तेन नञ्विशिष्टेनानञ्	२। १। ६०
सन्महत्परमोत्तमोत्कृष्टाः	
पूज्यमानैः	२। १। ६१
वृन्दारकनागकुञ्जरैः	
पूज्यमानम्	२। १। ६२
कतरकतमौ जातिपरिप्रश्ने	२। १। ६३
किं क्षेपे	२। १। ६४
पोटायुवतिस्तोककतिप-	
यगृष्टिधेनुवशावेहद्ध्क-	
यणीप्रवक्तृश्रोत्रियाध्या-	
पकधूर्तैर्नातिः	२। १। ६५
प्रशंसावचनैश्च	२। १। ६६

सूत्राणि ।	अ० पा० सू०
युवा खलतिपलितवलि-नजरतीभिः	२ । १ । ६७
कृत्यतुल्याख्या अजात्या	२ । १ । ६८
वर्णो वर्णेन	२ । १ । ६९
कुमारः श्रमणादिभिः	२ । १ । ७०
चतुष्पादो गर्भिण्या	२ । १ । ७१
मयूरव्यंसकादयश्च	२ । १ । ७२
समर्थोऽन्यपदार्थेसिद्धशुष्कसन्महद्बादश ॥	
॥ इति द्वितीयाध्यायस्य प्रथमः पादः॥ १॥	
पूर्वापराधरोत्तरमेकदेशि-नैकाधिकरणे	२ । २ । १
अर्धं नपुंसकम्	२ । २ । २
द्वितीयतृतीयचतुर्थतुर्या-ण्यन्यतरस्याम्	२ । २ । ३
मात्रापत्ने च द्वितीयया	२ । २ । ४
कालाः परिमाणिना	२ । २ । ५
नञ्	२ । २ । ६
ईषदकृता	२ । २ । ७
षष्ठी	२ । २ । ८
याजकादिभिश्च	२ । २ । ९
न निर्धारणे	२ । २ । १०
पूरणगुणसुहितार्थसदव्ययतव्यस-मानाधिकरणेन	२ । २ । ११
क्तेन च पूजायाम्	२ । २ । १२
अधिकरणवाचिना च	२ । २ । १३
कर्मणि च	२ । २ । १४
तृजकाभ्यां कर्त्तरि	२ । २ । १५
कर्त्तरि च	२ । २ । १६
नित्यं क्रीडाजीविकयोः	२ । २ । १७
कुगतिप्रादयः	२ । २ । १८
उपपदमतिङ्	२ । २ । १९

सूत्राणि ।	अ० पा० सू०
अमैवाव्ययेन	२ । २ । २०
तृतीयाप्रभृतीन्यन्यतरस्याम्	२ । २ । २१
क्त्वा च	२ । २ । २२
शेषो बहुव्रीहिः	२ । २ । २३
अनेकमन्यपदार्थे	२ । २ । २४
संख्ययाऽव्ययासन्नादूराधिक-संख्याः संख्येये	२ । २ । २५
दिङ्नामान्यन्तराले	२ । २ । २६
तत्र तेनेदमिति सरूपे	२ । २ । २७
तेन सहेति तुल्ययोगे	२ । २ । २८
चार्थे द्वन्द्वः	२ । २ । २९
उपसर्जनं पूर्वम्	२ । २ । ३०
राजदन्तादिषु परम्	२ । २ । ३१
द्वन्द्वे घि	२ । २ । ३२
अजाद्यदन्तम्	२ । २ । ३३
अल्पाच्तरम्	२ । २ । ३४
सप्तमीविशेषणे बहुव्रीहौ	१ । २ । ३५
निष्ठा	२ । २ । ३६
वाहिताग्न्यादिषु	२ । २ । ३७
कडाराः कर्मधारये	२ । २ । ३८
पूर्वापराधरोत्तरंतृतीयाप्रभृतीन्यष्टादश ॥	
इति द्वितीयाध्यायस्य द्वितीयः पादः॥२॥	
अनभिहिते	२ । ३ । १
कर्मणि द्वितीया	२ । ३ । २
तृतीया च होश्छन्दसि	२ । ३ । ३
अन्तराऽन्तरेण युक्ते	२ । ३ । ४
कालाध्वनोरत्यन्तसंयोगे	२ । ३ । ५
अपवर्गे तृतीया	२ । ३ । ६
सप्तमीपञ्चम्यौ कारकमध्ये	२ । ३ । ७
कर्मप्रवचनीययुक्ते द्वितीया	२ । ३ । ८

सूत्राणि ।	अ० पा० सू०
यस्मादधिकं यस्य चेश्वर-	
वचनं तत्र सप्तमी	२ । ३ । ९
पञ्चम्यपाङ्परिभिः	२ । ३ । १०
प्रतिनिधिप्रतिदाने च यस्माद्	२ । ३ । ११
गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौ	
चेष्टायामनध्वनि	२ । ३ । १२
चतुर्थी संप्रदाने	२ । ३ । १३
क्रियार्थोपपदस्य च कर्मणि	
स्थानिनः	२ । ३ । १४
तुमर्थाच्च भाववचनात्	२ । ३ । १५
नमःस्वस्तिस्वाहास्वधाऽलं-	
वषड्योगाच्च	२ । ३ । १६
अन्यकर्मण्यनादरे विभाषा-	
प्राणिषु	२ । ३ । १७
कर्तृकरणयोस्तृतीया	२ । ३ । १८
सहयुक्तेऽप्रधाने	२ । ३ । १९
येनाङ्गविकारः	२ । ३ । २०
इत्थंभूतलक्षणे	२ । ३ । २१
संज्ञोन्यतरस्यां कर्मणि	२ । ३ । २२
हेतौ	२ । ३ । २३
अकर्तर्यृणे पञ्चमी	२ । ३ । २४
विभाषागुणेऽस्त्रियाम्	२ । ३ । २५
षष्ठीहेतुप्रयोगे	२ । ३ । २६
सर्वनाम्नस्तृतीया च	२ । ३ । २७
अपादाने पञ्चमी	२ । ३ । २८
अन्यारादितरर्तेदिक्शब्दा-	
ञ्चूत्तरपदाजाहियुक्ते	२ । ३ । २९
षष्ठ्यतसर्थप्रत्ययेन	२ । ३ । ३०
एनपा द्वितीया	२ । ३ । ३१
पृथग्विनानानाभिस्तृती-	
याऽन्यतरस्याम्	२ । ३ । ३२

सूत्राणि ।	अ० पा० सू०
करणे च स्तोकाल्पकृच्छ्रकति-	
पयस्यासत्त्ववचनस्य	२ । ३ । ३३
दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्	२ । ३ । ३४
दूरान्तिकार्थेभ्यो द्वितीया च	२ । ३ । ३५
सप्तम्यधिकरणे च	२ । ३ । ३६
यस्य च भावेन भावलक्षणम्	२ । ३ । ३७
षष्ठी चानादरे	२ । ३ । ३८
स्वामीश्वराधिपतिदायादसा-	
क्षिप्रतिभूप्रसूतैश्च	२ । ३ । ३९
आयुक्तकुशलाभ्यां चासेवा-	
याम्	२ । ३ । ४०
यतश्च निर्धारणम्	२ । ३ । ४१
पञ्चमी विभक्ते	२ । ३ । ४२
साधुनिपुणाभ्यामर्चायां स-	
प्तम्यप्रतेः	२ । ३ । ४३
प्रसितोत्सुकाभ्यां तृतीया च	२ । ३ । ४४
नक्षत्रे च लुपि	२ । ३ । ४५
प्रातिपदिकार्थलिङ्गपरि-	
माणवचनमात्रे प्रथमा	२ । ३ । ४६
संबोधने च	२ । ३ । ४७
प्रामन्त्रितम्	२ । ३ । ४८
एकवचनं संबुद्धिः	२ । ३ । ४९
षष्ठी शेषे	२ । ३ । ५०
ज्ञोऽविदर्थस्य करणे	२ । ३ । ५१
अधीगर्थदयेशां कर्मणि	२ । ३ । ५२
कृञः प्रतियत्ने	२ । ३ । ५३
रुजार्थानां भाववचनानाम-	
ज्वरेः	२ । ३ । ५४
आशिषि नाथः	२ । ३ । ५५
जासिनिप्रहणननाटक्राथ-	
पिषां हिंसायाम्	२ । ३ । ५६

सूत्राणि ।	अ० पा० सू०
व्यवहृपणोः समर्थयोः	२ । ३ । ५७
दिवस्तदर्थस्य	२ । ३ । ५८
विभाषोपसर्गे	२ । ३ । ५९
द्वितीया ब्राह्मणे	२ । ३ । ६०
प्रेष्यब्रुवोर्हविषो देवता-संप्रदाने	२ । ३ । ६१
चतुर्थ्यर्थे बहुलं छन्दसि	२ । ३ । ६२
यजेश्च करणे	२ । ३ । ६३
कृत्वोर्थप्रयोगे कालेऽधिकरणे	२ । ३ । ६४
कर्तृकर्मणोः कृति	२ । ३ । ६५
उभयप्राप्तौ कर्मणि	२ । ३ । ६६
क्तस्य च वर्तमाने	२ । ३ । ६७
अधिकरणवाचिनश्च	२ । ३ । ६८
न लोकाव्ययनिष्ठाखलर्थ-तृनाम्	२ । ३ । ६९
अकेनोर्भविष्यदाधमर्ण्ययोः	२ । ३ । ७०
कृत्यानां कर्त्तरि वा	२ । ३ । ७१
तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्	२ । ३ । ७२
चतुर्थी चाशिष्यायुष्य-मद्रभद्रकुशलसुखार्थहितैः	२ । ३ । ७३
अनभिहितइत्थंभूतश्चप्रेष्यब्रुवोक्तयोदश ।	
॥इति द्वितीयाध्यायस्य तृतीयः पादः॥ ३॥	
द्विगुरेकवचनम्	२ । ४ । १
द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्	२ । ४ । २
अनुवादे चरणानाम्	२ । ४ । ३
अध्वर्यक्रतुरनपुंसकम्	२ । ४ । ४
अध्ययनतोऽविप्रकृष्टाख्या-नाम्	२ । ४ । ५
जातिरप्राणिनाम्	२ । ४ । ६
विशिष्टलिङ्गोनदीदेशोऽग्रामाः	२ । ४ । ७
क्षुद्रजन्तवः	२ । ४ । ८
येषां च विरोधः शाश्वतिकः	२ । ४ । ९
शूद्राणामनिरवसितानाम्	२ । ४ । १०
गवाश्वप्रभृतीनि च	२ । ४ । ११
विभाषावृक्षमृगतृणधान्यव्य-अनपशुशकुन्यश्ववडवपूर्वा-पराधरोत्तराणाम्	२ । ४ । १२
विप्रतिषिद्धं चानधिकरण-वाचि	२ । ४ । १३
न दधिपयआदीनि	२ । ४ । १४
अधिकरणैतावत्त्वे च	२ । ४ । १५
विभाषा समीपे	२ । ४ । १६
स नपुंसकम्	२ । ४ । १७
अव्ययीभावश्च	२ । ४ । १८
तत्पुरुषोऽनञ्कर्मधारयः	२ । ४ । १९
संज्ञायां कन्थोशीनरेषु	२ । ४ । २०
उपज्ञोपक्रमं तदाद्याचिख्या-सायाम्	२ । ४ । २१
छाया बाहुल्ये	२ । ४ । २२
सभा राजाऽमनुष्यपूर्वा	२ । ४ । २३
अशाला च	२ । ४ । २४
विभाषा सेनासुराच्छायाशा-लानिशानाम्	२ । ४ । २५
परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः	२ । ४ । २६
पूर्ववदश्ववडवौ	२ । ४ । २७
हेमन्तशिशिरावहोरात्रे च च्छन्दसि	२ । ४ । २८
रात्राह्नाहाः पुंसि	२ । ४ । २९
अपथं नपुंसकम्	२ । ४ । ३०
अर्धर्चाः पुंसि च	२ । ४ । ३१

सूत्राणि ।	अ० पा० सू०
इदमोऽन्वादेशेऽशनुदात्तस्तृती-	
यादौ	२ । ४ । ३२
एतदस्तसोस्तसौचानुदात्तौ	२ । ४ । ३३
द्वितीयाटौस्स्वेनः	२ । ४ । ३४
अर्धधातुके	२ । ४ । ३५
अदो जग्धिर्ल्यप्ति किति	२ । ४ । ३६
लुङ्सनोर्घस्लृ	२ । ४ । ३७
घञपोश्च	२ । ४ । ३८
बहुलं छन्दसि	२ । ४ । ३९
लिट्यन्यतरस्याम्	२ । ४ । ४०
वेञो वयिः	२ । ४ । ४१
हनो वध लिङि	२ । ४ । ४२
लुङि च	२ । ४ । ४३
आत्मनेपदेष्वन्यतरस्याम्	२ । ४ । ४४
इणो गा लुङि	२ । ४ । ४५
णौ गमिरबोधने	२ । ४ । ४६
सनि च	२ । ४ । ४७
इङश्च	२ । ४ । ४८
गाङ् लिटि	२ । ४ । ४९
विभाषा लुङ्लृङोः	२ । ४ । ५०
णौ च संश्चङोः	२ । ४ । ५१
अस्तेर्भूः	२ । ४ । ५२
ब्रुवो वचिः	२ । ४ । ५३
चक्षिङः ख्याञ्	२ । ४ । ५४
वा लिटि	२ । ४ । ५५
अजेर्व्यघञपोः	२ । ४ । ५६
वा यौ	२ । ४ । ५७
ण्यक्षत्रियार्षञितो यूनि	
लुगणिञोः	२ । ४ । ५८
पैलादिभ्यश्च	२ । ४ । ५९
इञः प्राचाम्	२ । ४ । ६०

सूत्राणि ।	अ० पा० सू०
न तौल्वलिभ्यः	२ । ४ । ६१
तद्राजस्य बहुषु तेनैवा-	
ऽस्त्रियाम्	२ । ४ । ६२
यस्कादिभ्यो गोत्रे	२ । ४ । ६३
यञञोश्च	२ । ४ । ६४
अत्रिभृगुकुत्सवसिष्ठ-	
गोतमाङ्गिरोभ्यश्च	२ । ४ । ६५
बह्वच इञः प्राच्यभरतेषु	२ । ४ । ६६
न गोपवनादिभ्यः	२ । ४ । ६७
तिककितवादिभ्यो द्वन्दे	२ । ४ । ६८
उपकादिभ्योऽन्यतरस्याम-	
द्वन्दे	२ । ४ । ६९
आगस्त्यकौण्डिन्ययोरग-	
स्तिकुण्डिनच्	२ । ४ । ७०
सुपो धातुप्रातिपदिकयोः	२ । ४ । ७१
अदिप्रभृतिभ्यः शपः	२ । ४ । ७२
बहुलं छन्दसि	२ । ४ । ७३
यङोऽचि च	२ । ४ । ७४
जुहोत्यादिभ्यः श्लुः	२ । ४ । ७५
बहुलं छन्दसि	२ । ४ । ७६
गातिस्थाघुपाभूभ्यः	
सिचः परस्मैपदेषु	२ । ४ । ७७
विभाषा घ्राधेट्शाच्छासः	२ । ४ । ७८
तनादिभ्यस्तथासोः	२ । ४ । ७९
मन्त्रे घसह्वरणशवृदहाद्वृच्-	
कृगमिजनिभ्यो लेः	२ । ४ । ८०
आमः	२ । ४ । ८१
अव्ययादाप्सुपः	२ । ४ । ८२
नाव्ययीभावादतोऽमृत्व-	
पञ्चम्याः	२ । ४ । ८३
तृतीयासप्तम्योर्बहुलम्	२ । ४ । ८४

सूत्राणि।	अ० पा० सू०
लुटः प्रथमस्य डारौरसः	२। ४। ८५
द्विगुरुपज्ञोक्तसंवत्सरोवर्यिनतौल्वलिभ्य आमः पञ्च ॥	
॥ इति द्वितीयोऽध्यायः ॥ २ ॥	
॥ तृतीयाऽध्यायप्रारम्भः॥	
प्रत्ययः	३। १। १
परश्च	३। १। २
आद्युदात्तश्च	३। १। ३
अनुदात्तौ सुप्पितौ	३। १। ४
गुप्तिज्किद्भ्यः सन्	३। १। ५
मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य	३। १। ६
धातोः कर्मणः समानकर्तृकादिच्छायां वा	३। १। ७
सुप आत्मनः क्यच्	३। १। ८
काम्यच्च	३। १। ९
उपमानादाचारे	३। १। १०
कर्तुः क्यङ् सलोपश्च	३। १। ११
भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः	३। १। १२
लोहितादिडाज्भ्यः क्यष्	३। १। १३
कष्टाय क्रमणे	३। १। १४
कर्मणो रोमन्थतपोभ्यां वर्तिचरोः	३। १। १५
बाष्पोष्मभ्यामुद्वमने	३। १। १६
शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे	३। १। १७
सुखादिभ्यः कर्तृवेदनायाम्	३। १। १८

सूत्राणि।	अ० पा० सू०
नमोवरिवश्चित्रङः क्यच्	३। १। १९
पुच्छभाण्डचीवराण्णिङ्	३। १। २०
मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्र-हलकलकृततूस्तेभ्यो णिच्	३। १। २१
धातोरेकाचो हलादेः क्रियासमभिहारे यङ्	३। १। २२
नित्यं कौटिल्ये गतौ	३। १। २३
लुपसदचरजपजभदह-दशगृभ्यो भावगर्हायाम्	३। १। २४
सत्यापपाशरूपवीणातूल-श्लोकसेनालोमत्वचवर्म-वर्णचूर्णचुरादिभ्यो णिच्	३। १। २५
हेतुमति च	३। १। २६
कण्ड्वादिभ्यो यक्	३। १। २७
गुपूधूपविच्छिपणिपनिभ्य आयः	३। १। २८
ऋतेरीयङ्	३। १। २९
कर्मणिङ्	३। १। ३०
आयादय आर्धधातुके वा	३। १। ३१
सनाद्यन्ता धातवः	३। १। ३२
स्यतासी ललुटोः	३। १। ३३
सिब्बहुलं लेटि	३। १। ३४
कासप्रत्ययादाममन्त्रे लिटि	३। १। ३५
इजादेश्च गुरुमतोऽनृच्छः	३। १। ३६
दयायासश्च	३। १। ३७
उषविदजागृभ्योऽन्यतरस्याम्	३। १। ३८
भीह्रीभृहुवां श्लुवच्च	३। १। ३९
कृञ्चानुप्रयुज्यते लिटि	३। १। ४०
विदांकुर्वन्त्वित्यन्यतरस्याम्	३। १। ४१
अभ्युत्सादयां प्रजनयां-	

सूत्राणि ।	अ० पा० सू०
चिकयां रमयामकः पावयां	
किंयाद्विदामक्रन्निति च्छन्दसि	३। १ । ४२
च्लि लुङि	३ । १ । ४३
च्लेः सिच्	३ । १ । ४४
शल इगुपधादनिटः क्सः	३ । १ । ४५
श्लिष आलिङ्गने	३ । १ । ४६
न दृशः	३ । १ । ४७
णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्	३ । १ । ४८
विभाषा धेट्श्व्योः	३ । १ । ४९
गुपेश्छन्दसि	३ । १ । ५०
नोनयतिध्वनयत्येलयत्यर्द- यतिभ्यः	३ । १ । ५१
अस्यतिवक्तिख्यातिभ्योऽङ्	३ । १ । ५२
लिपिसिचिह्वश्च	३ । १ । ५३
आत्मनेपदेष्वन्यतरस्याम्	३ । १ । ५४
पुषादिद्युताद्यृलृदितः परस्मै- पदेषु	३ । १ । ५५
सत्तिशास्त्यर्त्तिभ्यश्च	३ । १ । ५६
इरितो वा	३ । १ । ५७
जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लु- ञ्चुभ्यश्च	३ । १ । ५८
कृमृदृरुहिभ्यश्छन्दसि	३ । १ । ५९
चिण् ते पदः	३ । १ । ६०
दीपजनबुधपूरितायि- प्यायिभ्योऽन्यतरस्याम्	३ । १ । ६१
अचः कर्मकर्त्तरि	३ । १ । ६२
दुहश्च	३ । १ । ६३
न रुधः	३ । १ । ६४
तपोऽनुतापे च	३ । १ । ६५
चिण् भावकर्मणोः	३ । १ । ६६
सार्वधातुके यक्	३ । १ । ६७

सूत्राणि ।	अ० पा० सू०
कर्त्तरि शप्	३ । १ । ६८
दिवादिभ्यः श्यन्	३ । १ । ६९
वाभ्राशम्लाशभ्रमुक्रमुक्लमुत्र- सित्रुटिलषः	३ । १ । ७०
यसोऽनुपसर्गात्	३ । १ । ७१
संयसश्च	३ । १ । ७२
स्वादिभ्यः श्नुः	३ । १ । ७३
श्नुवः शृ च	३ । १ । ७४
अक्षोऽन्यतरस्याम्	३ । १ । ७५
तनूकरणे तक्षः	३ । १ । ७६
तुदादिभ्यः शः	३ । १ । ७७
रुदादिभ्यः श्नम्	३ । १ । ७८
तनादिकृञ्भ्य उः	३ । १ । ७९
धिन्विकृण्व्योरच	३ । १ । ८०
क्र्यादिभ्यः श्ना	३ । १ । ८१
स्तम्भुस्तुम्भुस्कम्भुस्कुम्भु- स्कुञ्भ्यः श्नुश्च	३ । १ । ८२
हलः श्नः शानज्झौ	३ । १ । ८३
छन्दसि शायजपि	३ । १ । ८४
व्यत्ययो बहुलम्	३ । १ । ८५
लिङ्याशिष्यङ्	३ । १ । ८६
कर्मवत्कर्मणा तुल्यक्रियः	३ । १ । ८७
तपस्तपःकर्मकस्यैव	३ । १ । ८८
न दुहस्नुनमां यक्चिणौ	३ । १ । ८९
कुषिरजोः प्राचां श्यन्परस्मै- पदं च	३ । १ । ९०
धातोः	३ । १ । ९१
तत्रोपपदं सप्तमीस्थम्	३ । १ । ९२
कृदतिङ्	३ । १ । ९३
वासरूपोऽस्त्रियाम्	३ । १ । ९४
कृत्याः	३ । १ । ९५

सूत्राणि।	अ० पा० सू०
तव्यत्तव्यानीयरः	३ । १ । ९६
अचो यत्	३ । १ । ९७
पोरदुपधात्	३ । १ । ९८
शकिसहोश्च	३ । १ । ९९
गदमदचरयमश्चानुपसर्गे	३ । १ । १००
अवद्यपण्यवर्या गर्ह्यपणित-व्यानिरोधेषु	३ । १ । १०१
वह्यं करणम्	३ । १ । १०२
अर्यः स्वामिवैश्ययोः	३ । १ । १०३
उपसर्या काल्या प्रजने	३ । १ । १०४
अजर्यं संगतम्	३ । १ । १०५
वदः सुपि क्यप् च	३ । १ । १०६
भुवो भावे	३ । १ । १०७
हनस्त च	३ । १ । १०८
एतिस्तुशास्वृदृजुषः क्यप्	३ । १ । १०९
ऋदुपधाच्चाकृपि चृतेः	३ । १ । ११०
ई च खनः	३ । १ । १११
भृञोऽसंज्ञायाम्	३ । १ । ११२
मृजेर्विभाषा	३ । १ । ११३
राजसूयसूर्यमृषोद्यरुच्यकुप्यकुष्टपच्याव्यथ्याः	३ । १ । ११४
भिद्योद्यौ नदे	३ । १ । ११५
पुष्यसिद्ध्यौ नक्षत्रे	३ । १ । ११६
विपूयविनीयजित्या मुञ्जकल्कहालिषु	३ । १ । ११७
प्रत्यपिभ्यां ग्रहेः	३ । १ । ११८
पदास्वैरिबाह्यापक्ष्येषु च	३ । १ । ११९
विभाषा कृवृषोः	३ । १ । १२०
युग्यं च पत्रे	३ । १ । १२१
अमावस्यदन्यतरस्याम्	३ । १ । १२२
छन्दसि निष्टर्क्यदेवहूयप्रणी-योन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि	३ । १ । १२३
ऋहलोर्ण्यत्	३ । १ । १२४
ओरावश्यके	३ । १ । १२५
आसुयुवपिरपिलपिन्नापिचमश्च	३ । १ । १२६
आनाय्योऽनित्ये	३ । १ । १२७
प्रणाय्योऽसंमतौ	३ । १ । १२८
पाय्यसान्नाय्यनिकाय्यध्याय्यामानहविर्निवासासामिधेनीषु	३ । १ । १२९
क्रतौ कुण्डपाय्यसंचाय्यौ	३ । १ । १३०
अग्नौ परिचाय्योपचाय्यसमूह्याः	३ । १ । १३१
चित्याग्निचित्ये च	३ । १ । १३२
ण्वुल्तृचौ	३ । १ । १३३
नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः	३ । १ । १३४
इगुपधज्ञाप्रीकिरः कः	३ । १ । १३५
आतश्चोपसर्गे	३ । १ । १३६
पाघ्राध्माधेट्दृशः शः	३ । १ । १३७
अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च	३ । १ । १३८
ददातिदधात्योर्विभाषा	३ । १ । १३९
ज्वलितिकसन्तेभ्यो णः	३ । १ । १४०
श्याद्व्यधाभ्सुसंस्रवतीणवसावहालिहाश्लिष्वसश्च	३ । १ । १४१

सूत्राणि ।	अ० पा० सू०
दुन्योरनुपसर्गे	३ । १ । १४२
विभाषा ग्रहः	३ । १ । १४३
गेहे कः	३ । १ । १४४
शिल्पिनि ष्वुन्	३ । १ । १४५
गः स्थकन्	३ । १ । १४६
ण्युट् च	३ । १ । १४७
हश्च व्रीहिकालयोः	३ । १ । १४८
मुसूल्वः समभिहारे वुन्	३ । १ । १४९
आशिषि च	३ । १ । १५०
मत्ययोमुण्डविदांदीपजनक्रिया-	
दिभ्योऽवद्यपण्ययुर्य्यंश्याव्यधादश ॥	
॥इति तृतीयाध्यायस्य प्रथमः पादः॥१॥	
कर्मण्यण्	३ । २ । १
ह्लावामश्च	३ । २ । २
आतोऽनुपसर्गे कः	३ । २ । ३
सुपिस्थः	३ । २ । ४
तुन्दशोकयोः परिमृजा-	
पनुदोः	३ । २ । ५
मे दाञः	३ । २ । ६
समि ख्यः	३ । २ । ७
गापोष्टक्	३ । २ । ८
हरतेरनुद्यमनेऽच्	३ । २ । ९
वयसि च	३ । २ । १०
आङि ताच्छील्ये	३ । २ । ११
अर्हः	३ । २ । १२
स्तम्बकर्णयोरमिजपोः	३ । २ । १३
शमि धातोः संज्ञायाम्	३ । २ । १४
अधिकरणे शेतेः	३ । २ । १५
चरेष्टः	३ । २ । १६
भिक्षासेनादायेषु च	३ । २ । १७
पुरोऽग्रतोऽग्रेषु सर्तेः	३ । २ । १८

सूत्राणि ।	अ० पा० सू०
पूर्वे कर्त्तरि	३ । २ । १९
कृञो हेतुताच्छील्यानुलो-	
म्येषु	३ । २ । २०
दिवाविभानिशाप्रभाभा-	
स्कारान्तानन्तादिबहुना-	
न्दीकिलिपिलिविवलिभक्ति-	
कर्तृचित्रक्षेत्रसंख्याज-	
ङ्घाबाह्लहर्यतद्धनुररुष्षु	३ । २ । २१
कर्मणि भृतौ	३ । २ । २२
न शब्दश्लोककलहगाथावै-	
रचाटुसूत्रमन्त्रपदेषु	३ । २ । २३
स्तम्बशकृतोरिन्	३ । २ । २४
इरतेर्ड्डतिनाथयोः पशौ	३ । २ । २५
फलेग्रहिरात्मम्भरिश्च	३ । २ । २६
छन्दसि वनसनरक्षिमथाम्	३ । २ । २७
एजेः खश्	३ । २ । २८
नासिकास्तनयोर्ध्माधेटोः	३ । २ । २९
नाडीमुष्ट्योश्च	३ । २ । ३०
उदिकूले रुजिवहोः	३ । २ । ३१
वहाभ्रे लिहः	३ । २ । ३२
परिमाणे पचः	३ । २ । ३३
मितनखे च	३ । २ । ३४
विध्वरुषोस्तुदः	३ । २ । ३५
अमूर्यललाट्योर्दृशितपोः	३ । २ । ३६
उग्रम्पश्येरम्मदपाणिन्धमाश्च	३ । २ । ३७
प्रियवशे वदः खच्	३ । २ । ३८
द्विषत्परयोस्तापेः	३ । २ । ३९
वाचि यमो व्रते	३ । २ । ४०
पूःसर्वयोर्दारिसहोः	३ । २ । ४१
सर्वकूलाभ्रकरीषेषु कषः	३ । २ । ४२
मेघर्त्तिभयेषु कृञः	३ । २ । ४३

सूत्राणि ।	अ० पा० सू०
क्षेमप्रियमद्रेऽण् च	३ । २ । ४४
आशिते भुवः करणभावयोः	३ । २ । ४५
संज्ञायां भृतृवृजिधारिसहित-पिदमः	३ । २ । ४६
गमश्च	३ । २ । ४७
अन्तात्यन्ताध्वदूरपारसर्वा-नन्तेषु डः	३ । २ । ४८
आशिषि हनः	३ । २ । ४९
अपे क्लेशतमसोः	३ । २ । ५०
कुमारशीर्षयोर्णिनिः	३ । २ । ५१
लक्षणे जायापत्योष्टक्	३ । २ । ५२
अमनुष्यकर्तृके च	३ । २ । ५३
शक्तौ हस्तिकपाटयोः	३ । २ । ५४
पाणिघताडघौ शिल्पिनि	३ । २ । ५५
आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ	
कृञः करणे ख्युन्	३ । २ । ५६
कर्तरि भुवः खिष्णुच्खुकञौ	३ । २ । ५७
स्पृशोऽनुदके क्विन्	३ । २ । ५८
ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च	३ । २ । ५९
त्यदादिषु दृशोऽनालोचने कञ्च	३ । २ । ६०
सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्	३ । २ । ६१
भजो ण्विः	३ । २ । ६२
छन्दसि सहः	३ । २ । ६३
वहश्च	३ । २ । ६४
कव्यपुरीषपुरीष्येषु ञ्युट्	३ । २ । ६५

सूत्राणि ।	अ० पा० सू०
हव्येऽनन्तःपादम्	३ । २ । ६६
जनसनखनक्रमगमो विट्	३ । २ । ६७
अदोऽनन्ने	३ । २ । ६८
कव्ये च	३ । २ । ६९
दुहः कप् घश्च	३ । २ । ७०
मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्	३ । २ । ७१
अवे यजः	३ । २ । ७२
विडुपे छन्दसि	३ । २ । ७३
आतो मनिन्क्वनिब्वनिपश्च	३ । २ । ७४
अन्येभ्योऽपि दृश्यन्ते	३ । २ । ७५
क्विप् च	३ । २ । ७६
स्थः क च	३ । २ । ७७
सुप्यजातौ णिनिस्ताच्छील्ये	३ । २ । ७८
कर्तर्युपमाने	३ । २ । ७९
व्रते	३ । २ । ८०
बहुलमाभीक्ष्ण्ये	३ । २ । ८१
मनः	३ । २ । ८२
आत्ममाने खश्च	३ । २ । ८३
भूते	३ । २ । ८४
करणे यजः	३ । २ । ८५
कर्मणि हनः	३ । २ । ८६
ब्रह्मभ्रूणवृत्रेषु क्विप्	३ । २ । ८७
बहुलं छन्दसि	३ । २ । ८८
सुकर्मपापमन्त्रपुण्येषु कृञः	३ । २ । ८९
सोमे सुञः	३ । २ । ९०
अग्नौ चेः	३ । २ । ९१
कर्मण्यध्याख्यायाम्	३ । २ । ९२
कर्मणीनि विकिपः	३ । २ । ९३
दृशेः कनिप्	३ । २ । ९४

सूत्राणि ।	अ०	पा०	सू०
राजनि युधि कृञ्भ्यः	३	२	९५
सहे च	३	२	९६
ससंम्यां जनेर्डः	३	२	९७
पञ्चम्यामजातौ	३	२	९८
उपसर्गे च संज्ञायाम्	३	२	९९
अनौ कर्मणि	३	२	१००
अन्येष्वपि दृश्यते	३	२	१०१
निष्ठा	३	२	१०२
सुयजोर्ङ्वनिप्	३	२	१०३
जीर्यतेरतृन्	३	२	१०४
छन्दसि लिट्	३	२	१०५
लिटः कानज्वा	३	२	१०६
क्वसुश्च	३	२	१०७
भाषायां सदवसश्रुवः	३	२	१०८
उपेयिवाननाश्वाननूचानश्च	३	२	१०९
लुङ्	३	२	११०
अनद्यतने लङ्	३	२	१११
अभिज्ञावचने लृट्	३	२	११२
न यदि	३	२	११३
विभाषा साकाङ्क्षे	३	२	११४
परोक्षे लिट्	३	२	११५
हशश्वतोर्लङ् च	३	२	११६
प्रश्ने चासन्नकाले	३	२	११७
लट् स्मे	३	२	११८
अपरोक्षे च	३	२	११९
ननौ पृष्टप्रतिवचने	३	२	१२०
नन्वोर्विभाषा	३	२	१२१
पुरि लुङ् चास्मे	३	२	१२२
वर्तमाने लट्	३	२	१२३
लटः शतृशानचावप्रथमा-समानाधिकरणे	३	२	१२४
संबोधने च	३	२	१२५
लक्षणहेत्वोः क्रियायाः	३	२	१२६
तौ सत्	३	२	१२७
पूङ्यजोः शानन्	३	२	१२८
ताच्छील्यवयोवचनशक्तिषु चानश्	३	२	१२९
इङ्धार्योः शत्रकृच्छ्रिणि	३	२	१३०
द्विषोऽमित्रे	३	२	१३१
मुजो यङ्संयोगे	३	२	१३२
अर्हः प्रशंसायाम्	३	२	१३३
आक्रोस्तच्छीलतद्धर्म-तत्साधुकारिषु	३	२	१३४
तृन्	३	२	१३५
अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्	३	२	१३६
णेश्छन्दसि	३	२	१३७
भुवश्च	३	२	१३८
ग्लाजिस्थश्ग्स्नुः	३	२	१३९
त्रसिगृधिधृषिक्षिपेः क्नुः	३	२	१४०
शमित्यष्टाभ्यो घिनुण्	३	२	१४१
सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाकीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च	३	२	१४२
वौ कषलसकत्थस्तम्भः	३	२	१४३
अपे च लषः	३	२	१४४

सूत्राणि	अ०	पा०	सू०
मे लपस्रुद्रुमथवदवसः	३	२	१४५
निन्दहिंसाक्लिशखादवि-			
नांशपरिक्षिपपरिरटपरिवा-			
दिव्याभाषासूयो वुञ्	३	२	१४६
देविक्रुशोश्चोपसर्गे	३	२	१४७
चलनशब्दार्थादकर्मकाद्युच्	३	२	१४८
अनुदात्तेतश्च हलादेः	३	२	१४९
जुचङ्क्रम्यदन्द्रम्यसृगृधि-			
ज्वलशुचलषपतपदः	३	२	१५०
क्रुधमण्डार्थेभ्यश्च	३	२	१५१
नयः	३	२	१५२
सूददीपदीक्षश्च	३	२	१५३
लषपतपदस्थाभूवृषहन-			
कमगमशृभ्य उकञ्	३	२	१५४
जल्पभिक्षकुट्टलुण्टवृङः			
षाकन्	३	२	१५५
मजोरिनिः	३	२	१५६
जिदक्षिविश्रीण्वमाव्यथा-			
भ्यमपरिभूप्रसूभ्यश्च	३	२	१५७
स्पृहिगृहिपतिदयिनिद्रात-			
न्द्राश्रद्धाभ्य आलुच्	३	२	१५८
दाधेट्सिशदसदोरुः	३	२	१५९
सृघस्यदः क्मरच्	३	२	१६०
भञ्जभासमिदो घुरच्	३	२	१६१
विदिभिदिच्छिदेः कुरकू	३	२	१६२
इणूनशजिसर्तिभ्यः क्करप्	३	२	१६३
गत्वरश्च	३	२	१६४
जागुरूकः	३	२	१६५
यजजपदशां यङः	३	२	१६६
नमिकम्पिस्म्यजसकमहिं-			
सदीपो रः	३	२	१६७

सूत्राणि।	अ०	पा०	सू०
सनाशंसभिक्ष उः	३	२	१६८
विन्दुरिच्छुः	३	२	१६९
क्याच्छन्दसि	३	२	१७०
आदृगमहनजनः किकिनौ			
लिट् च	३	२	१७१
स्वपितृषोर्नजिङ्	३	२	१७२
शृवन्द्योरारुः	३	२	१७३
भियः क्रुक्रुकनौ	३	२	१७४
स्थेशभासपिसकसो वरच्	३	२	१७५
यश्च यङः	३	२	१७६
भ्राजभासधुर्विद्युतोर्जिपृ-			
जुग्रावस्तुवः किप्	३	२	१७७
अन्येभ्योऽपि दृश्यते	३	२	१७८
भुवः संज्ञान्तरयोः	३	२	१७९
विभसम्भ्यो ड्रसंज्ञायाम्	३	२	१८०
धः कर्मणि ष्ट्रन्	३	२	१८१
दान्नीशसयुयुजस्तुतुदसि-			
सिचामिहपतदशनहः			
करणे	३	२	१८२
हलसूकरयोः पुवः	३	२	१८३
अर्तिलूधूसूखनसहचर इत्रः	३	२	१८४
पुवः संज्ञायाम्	३	२	१८५
कर्तरि चर्षिदेवतयोः	३	२	१८६
जीतः क्तः	३	२	१८७
मतिबुद्धिपूजार्थेभ्यश्च	३	२	१८८
कर्मणिदिवापूः सत्सूवहुलमन्येष्वपिनन्वोःश-			
मितिभञ्जभासधःकर्मण्यष्टौ ॥ इति तृतीया-			
ध्यायस्य द्वितीयः पादः ॥ २ ॥			
उणादयो वहुलम्	३	३	१
भूतेऽपि दृश्यन्ते	३	३	२
भविष्यति गम्यादयः	३	३	३
यावत्पुरानिपातयोर्लट्	३	३	४

सूत्राणि।	अ० पा० सू०
विभाषा कदाकर्ह्योः	३ । ३ । ५
किंवृत्ते लिप्सायाम्	३ । ३ । ६
लिप्स्यमानसिद्धौ च	३ । ३ । ७
लोडर्थलक्षणे च	३ । ३ । ८
लिङ् चोर्ध्वमौहूर्त्तिके	३ । ३ । ९
तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्	३ । ३ । १०
भाववचनाश्च	३ । ३ । ११
अण् कर्मणि च	३ । ३ । १२
लट् शेषे च	३ । ३ । १३
लटः सद्वा	३ । ३ । १४
अनद्यतने लुट्	३ । ३ । १५
पदरुजविशस्पृशो घञ्	३ । ३ । १६
सृ स्थिरे	३ । ३ । १७
भावे	३ । ३ । १८
अकर्तरि च कारके संज्ञायाम्	३ । ३ । १९
परिमाणाख्यायां सर्वेभ्यः	३ । ३ । २०
इङश्च	३ । ३ । २१
उपसर्गे रुवः	३ । ३ । २२
सामि युद्रुवः	३ । ३ । २३
श्रिणीभुवोऽनुपसर्गे	३ । ३ । २४
वौ क्षुश्रुवः	३ । ३ । २५
अवोदोर्नियः	३ । ३ । २६
मे द्रुस्तुस्रुवः	३ । ३ । २७
निरभ्योः पूल्वोः	३ । ३ । २८
उन्योर्ग्रः	३ । ३ । २९
कॄ धान्ये	३ । ३ । ३०
यज्ञे समि स्तुवः	३ । ३ । ३१
मे स्त्रोऽयज्ञे	३ । ३ । ३२
मथने वावशब्दे	३ । ३ । ३३
छन्दो नाम्नि च	३ । ३ । ३४

सूत्राणि।	अ० पा० सू०
उदि ग्रहः	३ । ३ । ३५
समि मुष्टौ	३ । ३ । ३६
परिन्योर्नीणोर्द्यूताभ्रेषयोः	३ । ३ । ३७
परावनुपात्यय इणः	३ । ३ । ३८
व्युपयोः शेतेः पर्याये	३ । ३ । ३९
हस्तादाने चेरस्तेये	३ । ३ । ४०
निवासचितिशरीरोपसमाधानेष्वादेश्च कः	३ । ३ । ४१
सङ्घे चानौत्तराधर्ये	३ । ३ । ४२
कर्मव्यतिहारे णच् स्त्रियाम्	३ । ३ । ४३
अभिविधौ भाव इनुण्	३ । ३ । ४४
आक्रोशेऽवन्योर्ग्रहः	३ । ३ । ४५
प्रे लिप्सायाम्	३ । ३ । ४६
परौ यज्ञे	३ । ३ । ४७
नौ वृ धान्ये	३ । ३ । ४८
उदि श्रयतियौतिपूद्रुवः	३ । ३ । ४९
विभाषाङि रुह्रुवोः	३ । ३ । ५०
अवे ग्रहो वर्षप्रतिबन्धे	३ । ३ । ५१
प्रे वणिजाम्	३ । ३ । ५२
दृशौ च	३ । ३ । ५३
वृणोतेराच्छादने	३ । ३ । ५४
परौ भुवोऽवज्ञाने	३ । ३ । ५५
एरच्	३ । ३ । ५६
ऋदोरप्	३ । ३ । ५७
ग्रहवृदृनिश्चिगमश्च	३ । ३ । ५८
उपसर्गेऽदः	३ । ३ । ५९
नौ ण च	३ । ३ । ६०
व्यधजपोरनुपसर्गे	३ । ३ । ६१
स्वनहसोर्वा	३ । ३ । ६२
यमः समुपनिविषु च	३ । ३ । ६३
नौ गदनदपठस्वनः	३ । ३ । ६४

सूत्राणि।	अ०	पा०	सू०
कृणो वीणायां च	३	३	६५
नित्यं पणः परिमाणे	३	३	६६
मदोऽनुपसर्गे	३	३	६७
ममदसम्मदौ हर्षे	३	३	६८
समुदोरजः पशुषु	३	३	६९
अक्षेषु ग्लहः	३	३	७०
मजने सर्तेः	३	३	७१
ह्वः संप्रसारणं च न्यभ्युपविषु	३	३	७२
आङि युद्धे	३	३	७३
निपानमाहावः	३	३	७४
भावेऽनुपसर्गस्य	३	३	७५
हनश्च वधः	३	३	७६
मूर्तौ घनः	३	३	७७
अन्तर्घनो देशे	३	३	७८
अगारैकदेशे प्रघणः प्रघाणश्च	३	३	७९
उद्घनोऽत्याधानम्	३	३	८०
अपघनोऽङ्गम्	३	३	८१
करणेऽयोविद्रुषु	३	३	८२
स्तम्बे क च	३	३	८३
परौ घः	३	३	८४
उपघ्न आश्रये	३	३	८५
सङ्घोद्घौ गणप्रशंसयोः	३	३	८६
निघो निमितम्	३	३	८७
डितः क्तिः	३	३	८८
ट्वितोऽथुच्	३	३	८९
यजयाचयतविच्छप्रच्छरक्षो नङ्	३	३	९०
स्वपो नन्	३	३	९१
उपसर्गे घोः किः	३	३	९२
कर्मण्यधिकरणे च	३	३	९३
स्त्रियां क्तिन्	३	३	९४
स्थागापापचो भावे	३	३	९५
मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः	३	३	९६
ऊतियूतिजूतिसातिहेतिकीर्तयश्च	३	३	९७
व्रजयजोर्भावे क्यप्	३	३	९८
संज्ञायां समजनिषदनिपतमनविदधृञ्शीङ्भृञ्मिणः	३	३	९९
कृञः श च	३	३	१००
इच्छा	३	३	१०१
अ प्रत्ययात्	३	३	१०२
गुरोश्च हलः	३	३	१०३
षिद्भिदादिभ्योऽङ्	३	३	१०४
चिन्तिपूजिकथिकुम्बिचर्चश्च	३	३	१०५
आतश्चोपसर्गे	३	३	१०६
ण्यासश्रन्थो युच्	३	३	१०७
रोगाख्यायां ण्वुल्बहुलम्	३	३	१०८
संज्ञायाम्	३	३	१०९
विभाषाख्यानपरिप्रश्नयोरिञ्च	३	३	११०
पर्यायार्हणोत्पत्तिषु ण्वुच्	३	३	१११
आक्रोशे नञ्यनिः	३	३	११२
कृत्यल्युटो बहुलम्	३	३	११३
नपुंसके भावे क्तः	३	३	११४
ल्युट् च	३	३	११५
कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्	३	३	११६
करणाधिकरणयोश्च	३	३	११७
पुंसि संज्ञायां घः प्रायेण	३	३	११८
गोचरसंचरवहव्रजव्यजापणनिगमाश्च	३	३	११९

सूत्राणि ।	अ०	पा०	सू०
अवे तॄस्त्रोर्घञ्	३	३	१२०
हलश्च	३	३	१२१
अध्यायन्यायोद्यावसं-			
हाराश्च	३	३	१२२
उदङ्कोऽनुदके	३	३	१२३
जालमानायः	३	३	१२४
स्नेो घ च	३	३	१२५
ईषदुःसुषु कृच्छ्राकृच्छ्रा-			
र्थेषु खल्	३	३	१२६
कर्तृकर्मणोश्च भूकृञोः	३	३	१२७
आतो युच्	३	३	१२८
छन्दसि गत्यर्थेभ्यः	३	३	१२९
अन्येभ्योऽपि दृश्यते	३	३	१३०
वर्तमानसामीप्ये वर्तमान-			
वद्वा	३	३	१३१
आशंसायां भूतवच्च	३	३	१३२
क्षिप्रवचने लृट्	३	३	१३३
आशंसावचने लिङ्	३	३	१३४
नानद्यतनवत्क्रियाप्रब-			
न्धसामीप्ययोः	३	३	१३५
भविष्यति मर्यादावचनेऽ			
वरस्मिन्	३	३	१३६
कालविभागे चानहोरात्रा-			
णाम्	३	३	१३७
परस्मिन्विभाषा	३	३	१३८
लिङ्निमित्ते लङ् क्रिया-			
तिपत्तौ	३	३	१३९
भूते च	३	३	१४०
वोताप्योः	३	३	१४१
गर्हायां लङपिजात्वोः	३	३	१४२
विभाषा कथमि लिङ् च	३	३	१४३

सूत्राणि ।	अ०	पा०	सू०
किंवृत्ते लिङ्लटौ	३	३	१४४
अनवक्लृप्त्यमर्षयोर-			
किंवृत्तेऽपि	३	३	१४५
क्रिंह्विलास्त्यर्थेषु लट्	३	३	१४६
जातुयदोर्लिङ्	३	३	१४७
यच्चयत्रयोः	३	३	१४८
गर्हायां च	३	३	१४९
चित्रीकरणे च	३	३	१५०
शेषे लङ्यदौ	३	३	१५१
उताप्योः समर्थयोर्लिङ्	३	३	१५२
काममवेदनेऽकच्चिति	३	३	१५३
सम्भावनेऽलमिति चेत्सि-			
द्धाप्रयोगे	३	३	१५४
विभाषा धातौ सम्भावन-			
वचनेऽयदि	३	३	१५५
हेतुहेतुमतोर्लिङ्	३	३	१५६
इच्छार्थेषु लिङ्लोटौ	३	३	१५७
समानकर्तृकेषु तुमुन्	३	३	१५८
लिङ् च	३	३	१५९
इच्छार्थेभ्यो विभाषा वर्त-			
माने	३	३	१६०
विधिनिमन्त्रणामन्त्रणा-			
धीष्टसंप्रश्नप्रार्थनेषु लिङ्	३	३	१६१
लोट् च	३	३	१६२
प्रैषातिसर्गप्राप्तकालेषु			
कृत्याश्च	३	३	१६३
लिङ् चोर्ध्वमौहूर्त्तिके	३	३	१६४
स्मे लोट्	३	३	१६५
अधीष्टे च	३	३	१६६
कालसमयवेलासु तुमुन्	३	३	१६७
लिङ्यदि	३	३	१६८

सूत्राणि।	अ० पा०	सू०
अर्हे कृत्यतृचश्च	३ । ३ ।	१६९
आवश्यकाधमर्ण्ययोर्णिनिः	३ । ३ ।	१७०
कृत्याश्च	३ । ३ ।	१७१
शकि लिङ् च	३ । ३ ।	१७२
आशिषि लिङ्लोटौ	३ । ३ ।	१७३
क्तिचूक्तौ च संज्ञायाम्	३ । ३ ।	१७४
माङि लुङ्	३ । ३ ।	१७५
स्मोत्तरे लङ् च	३ । ३ ।	१७६
उणादयइङोनिवासव्यधजपोरपघनोङ्कमि-		
च्छाहलश्चवोताप्योर्विधिनिमन्त्रणाषोडश ॥		
॥इति तृतीयाध्यायस्य तृतीयः पादः॥३॥		
धातुसम्बन्धे प्रत्ययाः	३ । ४ ।	१
क्रियासमभिहारे लोट् लोटो		
हिस्वौ वा च तध्वमोः	३ । ४ ।	२
समुच्चयेऽन्यतरस्याम्	३ । ४ ।	३
यथाविध्यनुप्रयोगः पूर्वस्मिन्	३ । ४ ।	४
समुच्चये सामान्यवचनस्य	३ । ४ ।	५
छन्दसि लुङ्लङ्लिटः	३ । ४ ।	६
लिङर्थे लेट्	३ । ४ ।	७
उपसंवादाशङ्कयोश्च	३ । ४ ।	८
तुमर्थे सेसेनसेअसेन्क्सेकसे-		
नध्यैअध्यैन्कध्यैकध्यैन्-		
शध्यैशध्यैन्तवैतवेङ्-		
तवेनः	३ । ४ ।	९
प्रयैरोहिष्यैअव्यथिष्यै	३ । ४ ।	१०
दृशे विख्ये च	३ । ४ ।	११
शकि णमुल्कमुलौ	३ । ४ ।	१२
ईश्वरेतोसुन्कसुनौ	३ । ४ ।	१३
कृत्यार्थे तवैकेन्केन्यत्वनः	३ । ४ ।	१४
अवचक्षे च	३ । ४ ।	१५
भावलक्षणे स्थेणृकृञ्वदिचरि-		

सूत्राणि।	अ० पा०	सू०
हुतमिजनिभ्यस्तोसुन्	३ । ४ ।	१६
सृपितृदोः कसुन्	३ । ४ ।	१७
अलंखल्वोः प्रतिषेधयोः प्रा-		
चां क्त्वा	३ । ४ ।	१८
उदीचां माङो व्यतीहारे	३ । ४ ।	१९
परावरयोगे च	३ । ४ ।	२०
समानकर्तृकयोः पूर्वकाले	३ । ४ ।	२१
आभीक्ष्ण्ये णमुल् च	३ । ४ ।	२२
न यद्यनाकाङ्क्षे	३ । ४ ।	२३
विभाषाग्रेप्रथमपूर्वेषु	३ । ४ ।	२४
कर्मण्याक्रोशे कृञः खमुञ्	३ । ४ ।	२५
स्वादुमि णमुल्	३ । ४ ।	२६
अन्यथैवंकथमित्थंसुसिद्धा-		
प्रयोगश्चेत्	३ । ४ ।	२७
यथातथयोरसूयाप्रतिवचने	३ । ४ ।	२८
कर्माणि दृशिविदोः साकल्ये	३ । ४ ।	२९
यावति विन्दजीवोः	३ । ४ ।	३०
चर्मोदरयोः पूरेः	३ । ४ ।	३१
वर्षप्रमाण ऊलोपश्चास्याऽन्य-		
तरस्याम्	३ । ४ ।	३२
चेले क्नोपेः	३ । ४ ।	३३
निमूलसमूलयोः कषः	३ । ४ ।	३४
शुष्कचूर्णरूक्षेषु पिषः	३ । ४ ।	३५
समूलाकृतजीवेषु हन्कृञग्रहः	३ । ४ ।	३६
करणे हनः	३ । ४ ।	३७
मुखं स्वाङ्गम्	६	२	१६७
नाव्ययदिक्शब्दगोमहत्स्थूल-मुष्टिपृथुवत्सेभ्यः	६	२	१६८
निष्ठोपमानादन्यतरस्याम्	६	२	१६९
जातिकालसुखादिभ्योऽनाच्छादनाद् क्तोऽकृतमितमतिपन्नाः	६	२	१७०
वा जाते	६	२	१७१
नञ्सुभ्याम्	६	२	१७२
कपि पूर्वम्	६	२	१७३
ह्रस्वान्तेऽन्त्यात्पूर्वम्	६	२	१७४
बहोर्नञ्वदुत्तरपदभूम्नि	६	२	१७५
न गुणादयोवयवाः	६	२	१७६
उपसर्गात्स्वाङ्गं ध्रुवमपर्शु	६	२	१७७
वनं समासे	६	२	१७८
अन्तः	६	२	१७९
अन्तश्च	६	२	१८०
न निविभ्याम्	६	२	१८१
परेरभितोभावि मण्डलम्	६	२	१८२

सूत्राणि।	अ०	पा०	सू०
प्रादस्वाङ्गं संज्ञायाम्	६	२	१८३
निरुदकादीनि च	६	२	१८४
अभेर्मुखम्	६	२	१८५
अपाच्च	६	२	१८६
स्फिगपूतवीणाञ्जोऽध्व-कुक्षिसीरनामनाम च	६	२	१८७
अधेरुपरिस्थम्	६	२	१८८
अनोरप्रधानकनीयसी	६	२	१८९
पुरुषश्चान्वादिष्टः	६	२	१९०
अतेरकृत्पदे	६	२	१९१
नेरनिधाने	६	२	१९२
अतेरंश्वादयस्तत्पुरुषे	६	२	१९३
उपाद् द्यजजिनमगौरादयः	६	२	१९४
सोरवक्षेपणे	६	२	१९५
विभाषोत्पुच्छे	६	२	१९६
द्वित्रिभ्यां पादन्मूर्धसु बहु-व्रीहौ	६	२	१९७
सक्थं चाक्रान्तात्	६	२	१९८
पराद्यिच्छन्दसि बहुलम्	६	२	१९९
बहुव्रीहावाशंगौः सादक्तेनानित्यार्थेयुक्तानहास्तिनकूलदेवताविभाषानानिविभ्यामेकोनविंशतिः ॥ इति षष्ठाध्यायस्य द्वितीयः पादः ॥ २ ॥			
अलुगुत्तरपदे	६	३	१
पञ्चम्याः स्तोकादिभ्यः	६	३	२
ओजःसहोम्भस्तमसस्तृतीयायाः	६	३	३
मनसः संज्ञायाम्	६	३	४
आज्ञायिनि च			
आत्मनश्च	६	३	६
वैयाकरणाख्यायां चतुर्थ्याः	६	३	७
परस्य च	६	३	८

सूत्राणि।	अ०	पा०	सू०
हलदन्तात्सप्तम्याः संज्ञायाम्	६	३	९
कारनाम्नि च प्राचां हलादौ	६	३	१०
मध्याद्गुरौ	६	३	११
अमूर्द्धमस्तकात्स्वाङ्गादकामे	६	३	१२
बन्धे च विभाषा	६	३	१३
तत्पुरुषे कृति बहुलम्	६	३	१४
प्रावृट्शरत्कालदिवां जे	६	३	१५
विभाषा वर्षक्षरशरवरात्	६	३	१६
घकालतनेषु कालनाम्नः	६	३	१७
शयवासवासिष्वकालात्	६	३	१८
नेन्सिद्धबध्नातिषु च	६	३	१९
स्थे च भाषायाम्	६	३	२०
षष्ठ्या आक्रोशे	६	३	२१
पुत्रेऽन्यतरस्याम्	६	३	२२
ऋतो विद्यायोनिसम्बन्धेभ्यः	६	३	२३
विभाषा स्वसृपत्योः	६	३	२४
आनङ् ऋतो द्वन्द्वे	६	३	२५
देवताद्वन्द्वे च	६	३	२६
ईदग्नेः सोमवरुणयोः	६	३	२७
इद्वृद्धौ	६	३	२८
दिवो द्यावा	६	३	२९
दिवसश्च पृथिव्याम्	६	३	३०
उषासोषसः	६	३	३१
मातरपितरावुदीचाम्	६	३	३२
पितरामातरा च च्छन्दसि	६	३	३३
स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणेऽस्त्रियामपूरणीप्रियादिषु	६	३	३४
तसिलादिष्वाकृत्वसुचः	६	३	३५
क्यङ्मानिनोश्च	६	३	३६
न कोपधायाः	६	३	३७

सूत्राणि ।	अ०	पा०	सू०
संज्ञापूरण्योश्च	६	३	३८
वृद्धिनिमित्तस्य च तद्धित-स्यारक्तविकारे	६	३	३९
स्वाङ्गाच्चेतः	६	३	४०
जातेश्च	६	३	४१
पुंवत्कर्मधारयजातीयदेशीयेषु	६	३	४२
घरूपकल्पचेलड्वुवगोत्रम-तहतेषु ङ्योऽनेकाक्षो ह्रस्वः	६	३	४३
नद्याः शेषस्यान्यतरस्याम्	६	३	४४
ङ्गितश्च	६	३	४५
आन्महतः समानाधिकरण-जातीययोः	६	३	४६
द्व्यष्टनः संख्यायामबहुव्रीह्य-शीत्योः	६	३	४७
त्रेस्त्रयः	६	३	४८
विभाषा चत्वारिंशत्प्रभृतौ स-र्वेषाम्	६	३	४९
हृदयस्य हृल्लेखयदण्लासेषु	६	३	५०
वा शोकष्यञ्रोगेषु	६	३	५१
पादस्यपदाऽऽज्यातिगोपहतेषु	६	३	५२
पद्यत्यतदर्थे	६	३	५३
हिमकाषिहतिषु च	६	३	५४
ऋचः शे	६	३	५५
वा घोषमिश्रशब्देषु	६	३	५६
उदकस्योदः संज्ञायाम्	६	३	५७
पेषंवासवाहनधिषु च	६	३	५८
एकहलादौ पूरयितव्येऽन्यत-रस्याम्	६	३	५९
मन्थौदनसक्तुबिन्दुवज्रभार-हारवीवधगाहेषु च	६	३	६०

सूत्राणि ।	अ०	पा०	सू०
इको ह्रस्वोऽङ्यो गालवस्य	६	३	६१
एकतद्धिते च	६	३	६२
ङ्यापोः संज्ञाछन्दसोर्बहुलम्	६	३	६३
त्वे च	६	३	६४
इष्टकेषीकामालानां चिततूल-भारिषु	६	३	६५
खित्यनव्ययस्य	६	३	६६
अरुर्द्विषदजन्तस्य मुम्	६	३	६७
इच एकाचोऽम्प्रत्ययवच्च	६	३	६८
वाचंयमपुरन्दरौ च	६	३	६९
कारे सत्याऽगदस्य	६	३	७०
श्येनतिलस्य पाते ञे	६	३	७१
रात्रेः कृति विभाषा	६	३	७२
नलोपोऽनञः	६	३	७३
तस्मान्नुडचि	६	३	७४
नभ्राण्नपान्नवेदानासत्यान-मुचिनकुलनखनपुंसक-नक्षत्रनक्रनाकेषु प्रकृत्या	६	३	७५
एकादिश्चैकस्य चादुक्	६	३	७६
नगोप्राणिष्वन्यतरस्याम्	६	३	७७
सहस्य सः संज्ञायाम्	६	३	७८
ग्रन्थान्ताधिके च	६	३	७९
द्वितीये चानुपाख्ये	६	३	८०
अव्ययीभावे चाकाले	६	३	८१
वोपसर्जनस्य	६	३	८२
प्रकृत्याऽऽशिषि	६	३	८३
समानस्य च्छन्दस्यमूर्द्धप्रभृत्यु-दर्केषु	६	३	८४
ज्योतिर्जनपदरात्रिनाभिनाम-गोत्ररूपस्थानवर्णवयोवचनब-न्धुषु	६	३	८५

सूत्राणि ।	अ०	पा०	सू०
चरणे ब्रह्मचारिणि	६	३	८६
तीर्थे ये	६	३	८७
विभाषोदरे	६	३	८८
दृग्दृशवतुषु	६	३	८९
इदंकिमोरीशूकी	६	३	९०
आ सर्वनाम्नः	६	३	९१
विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये	६	३	९२
समः समि	६	३	९३
तिरसस्तिर्यलोपे	६	३	९४
सहस्य सधिः	६	३	९५
सधमादस्थयोश्छन्दसि	६	३	९६
व्यन्तरुपसर्गेभ्योऽप ईत्	६	३	९७
ऊदनोर्देशे	६	३	९८
अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु	६	३	९९
अर्थे विभाषा	६	३	१००
कोः कत्तत्पुरुषेऽचि	६	३	१०१
रथवदयोश्च	६	३	१०२
तृणे च जातौ	६	३	१०३
का पथ्यक्षयोः	६	३	१०४
ईषदर्थे	६	३	१०५
विभाषा पुरुषे	६	३	१०६
कवं चोष्णे	६	३	१०७
पथि च च्छन्दसि	६	३	१०८
पृषोदरादीनि यथोपदिष्टम्	६	३	१०९
संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यां ङौ	६	३	११०
ढ्रलोपे पूर्वस्य दीर्घोऽणः	६	३	१११
सहिवहोरोदवर्णस्य	६	३	११२
साढ्यैसाढ्वासाढेति निगमे	६	३	११३
संहितायाम्	६	३	११४
कर्णेलक्षणस्याऽविष्टाष्टपञ्चमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य	६	३	११५
नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ	६	३	११६
वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम्	६	३	११७
वले	६	३	११८
मतौ वह्वचोऽनजिरादीनाम्	६	३	११९
शरादीनां च	६	३	१२०
इको वहेऽपीलोः	६	३	१२१
उपसर्गस्य घञ्यमनुष्ये बहुलम्	६	३	१२२
इकः काशे	६	३	१२३
दस्ति	६	३	१२४
अष्टनः संज्ञायाम्	६	३	१२५
छन्दसि च	६	३	१२६
चितेः कपि	६	३	१२७
विश्वस्य वसुराटोः	६	३	१२८
नरे संज्ञायाम्	६	३	१२९
मित्रे चर्षौ	६	३	१३०
मन्त्रे सोमाऽश्वेन्द्रियविश्वदेव्यस्य मतौ	६	३	१३१
ओषधेश्च विभक्तावप्रथमायाम्	६	३	१३२
ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्	६	३	१३३
इकः सुञि	६	३	१३४
व्यचोऽतस्तिङः	६	३	१३५

सूत्राणि।	अ० पा० सू०
निपातस्य च	६ । ३ । १३६
अन्येषामपि दृश्यते	६ । ३ । १३७
चौ	६ । ३ । १३८
संप्रसारणस्य	६ । ३ । १३९
अलुक्षष्ठ्याजातेरिकोऽव्ययीभावेकोःकत्त- दिकोवहएकोनविंशतिः॥इति षष्ठाध्यायस्य तृतीयः पादः ॥ ३ ॥	
अङ्गस्य	६ । ४ । १
हलः	६ । ४ । २
नामि	६ । ४ । ३
न तिसृचतसृ	६ । ४ । ४
छन्दःयुभयथा	६ । ४ । ५
नृ च	६ । ४ । ६
नोपधायाः	६ । ४ । ७
सर्वनामस्थाने चासम्बुद्धौ	६ । ४ । ८
ब्रा ऽपूर्वस्य निगमे	६ । ४ । ९
सान्तमहतः संयोगस्य	६ । ४ । १०
अस्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहो- तृपोतृप्रशास्तृणाम्	६ । ४ । ११
इन्हन्पूषार्यम्णां शौ	६ । ४ । १२
सौ च	६ । ४ । १३
अत्वसन्तस्य चाधातोः	६ । ४ । १४
अनुनासिकस्य क्विझलोः कृङिति	६ । ४ । १५
अञ्झनगमां सनि	६ । ४ । १६
तनोतेर्विभाषा	६ । ४ । १७
क्मश्च क्तिव	६ । ४ । १८
च्छ्वोः शूडनुनासिके च	६ । ४ । १९
ज्वरत्वरस्त्रिव्यविमवामुप- धायाश्च	६ । ४ । २०
राल्लोपः	६ । ४ । २१

सूत्राणि।	अ० पा० सू०
असिद्धवदत्राभात्	६ । ४ । २२
इनान्नलोपः	६ । ४ । २३
अनिदितां हल उपधायाः क्ङिति	६ । ४ । २४
दंशसञ्जस्वञ्जां शपि	६ । ४ । २५
रञ्जेश्च	६ । ४ । २६
घञि च भावकरणयोः	६ । ४ । २७
स्यदो जवे	६ । ४ । २८
अवोदैधौद्म्यप्रश्रथहिमश्रथाः	६ । ४ । २९
नाञ्चेः पूजायाम्	६ । ४ । ३०
क्तिव स्कन्दिस्यन्दोः	६ । ४ । ३१
जान्तनशां विभाषा	६ । ४ । ३२
भञ्जेश्च चिणि	६ । ४ । ३३
शास इदङ्हलोः	६ । ४ । ३४
शा हौ	६ । ४ । ३५
हन्तेर्जः	६ । ४ । ३६
अनुदात्तोपदेशवनतितनोत्या- दीनामनुनासिकलोपो झलि क्ङिति	६ । ४ । ३७
वा ल्यपि	६ । ४ । ३८
न क्तिचि दीर्घश्च	६ । ४ । ३९
गमः क्वौ	६ । ४ । ४०
विड्वनोरनुनासिकस्याऽऽत्	६ । ४ । ४१
जनसनखनां सञ्झलोः	६ । ४ । ४२
ये विभाषा	६ । ४ । ४३
तनोतेर्यकि	६ । ४ । ४४
सनः क्तिचि लोपश्चास्याऽन्य- तरस्याम्	६ । ४ । ४५
आर्द्धधातुके	६ । ४ । ४६
भ्रस्जोरोपधयोरमन्यतर- स्याम्	६ । ४ । ४७

सूत्राणि ।	अ० पा० सू०
अतो लोपः	६ । ४ । ४८
यस्य हलः	६ । ४ । ४९
क्यस्य विभाषा	६ । ४ । ५०
णेरनिटि	६ । ४ । ५१
निष्ठायां सेटि	६ । ४ । ५२
जनिता मन्त्रे	६ । ४ । ५३
शमिता यज्ञे	६ । ४ । ५४
अयामन्ताल्वाय्येत्न्विष्णुषु	६ । ४ । ५५
ल्यपि लघुपूर्वात्	६ । ४ । ५६
विभाषा पः	६ । ४ । ५७
युष्मदस्मदोर्ङसि च्छन्दसि	६ । ४ । ५८
क्षियः	६ । ४ । ५९
निष्ठायामण्यदर्थे	६ । ४ । ६०
वा क्रोशदैन्ययोः	६ । ४ । ६१
स्यसिचसीयुट्तासिषु भाव-कर्मणोरुपदेशेऽज्झनग्रह-दृशां वा चिण्वदिट् च	६ । ४ । ६२
दीङो युडचि क्ङिति	६ । ४ । ६३
आतो लोप इटि च	६ । ४ । ६४
ईद्यति	६ । ४ । ६५
घुमास्थागापाजहातिसां हलि	६ । ४ । ६६
एर्लिङि	६ । ४ । ६७
वाऽन्यस्य संयोगादेः	६ । ४ । ६८
न ल्यपि	६ । ४ । ६९
मयतेरिदन्यतरस्याम्	६ । ४ । ७०
लुङ्लङ्लङ्क्ष्वडुदात्तः	६ । ४ । ७१
आडजादीनाम्	६ । ४ । ७२
छन्दस्यपि दृश्यते	६ । ४ । ७३
न माङ्योगे	६ । ४ । ७४
बहुलं छन्दस्यमाङ्योगेऽपि	६ । ४ । ७५
इरयो रे	६ । ४ । ७६

सूत्राणि ।	अ० पा० सू०
अचि श्नुधातुभ्रुवां य्वोरियङुवङौ	६ । ४ । ७७
अभ्यासस्यासवर्णे	६ । ४ । ७८
क्रियाः	६ । ४ । ७९
वाम्शसोः	६ । ४ । ८०
इणो यण्	६ । ४ । ८१
एरनेकाचोऽसंयोगपूर्वस्य	६ । ४ । ८२
ओः सुपि	६ । ४ । ८३
वर्षाभ्वश्च	६ । ४ । ८४
न भूसुधियोः	६ । ४ । ८५
छन्दस्युभयथा	६ । ४ । ८६
हुश्नुवोः सार्वधातुके	६ । ४ । ८७
भुवो वुग्लुङ्लिटोः	६ । ४ । ८८
ऊदुपधाया गोहः	६ । ४ । ८९
दोषो णौ	६ । ४ । ९०
वा चित्तविरागे	६ । ४ । ९१
मितां ह्रस्वः	६ । ४ । ९२
चिण्णमुलोर्दीर्घोऽन्यतरस्याम्	६ । ४ । ९३
खचि ह्रस्वः	६ । ४ । ९४
ह्लादो निष्ठायाम्	६ । ४ । ९५
छादेर्घेऽद्व्युपसर्गस्य	६ । ४ । ९६
इस्मन्त्रन्क्विषु च	६ । ४ । ९७
गमहनजनखनघसां लोपः क्ङित्यनङि	६ । ४ । ९८
तनिपत्योश्छन्दसि	६ । ४ । ९९
घसिभसोर्हलि च	६ । ४ । १००
हुझल्भ्यो हेर्धिः	६ । ४ । १०१
श्रुशृणुपॄकृवृभ्यश्छन्दसि	६ । ४ । १०२
अङितश्च	६ । ४ । १०३
चिणो लुक्	६ । ४ । १०४
अतो हेः	६ । ४ । १०५

सूत्राणि।	अ०	पा०	सू०
उतश्च प्रत्ययादसंयोगपूर्वात्	६	४	१०६
लोपश्चास्यान्यतरस्यां म्वोः	६	४	१०७
नित्यं करोतेः	६	४	१०८
ये च	६	४	१०९
अत उत्सार्वधातुके	६	४	११०
श्नसोरल्लोपः	६	४	१११
श्नाभ्यस्तयोरातः	६	४	११२
ईहल्यघोः	६	४	११३
इद्दरिद्रस्य	६	४	११४
भियोऽन्यतरस्याम्	६	४	११५
जहातेश्च	६	४	११६
आ च हौ	६	४	११७
लोपो यि	६	४	११८
ध्वसोरेद्धावभ्यासलोपश्च	६	४	११९
अत एकहल्मध्येऽनादेशादेर्लिटि	६	४	१२०
थलि च सेटि	६	४	१२१
तृफलभजत्रपश्च	६	४	१२२
राधो हिंसायाम्	६	४	१२३
वा जॄभ्रमुत्रसाम्	६	४	१२४
फणां च सप्तानाम्	६	४	१२५
न शसददवादिगुणानाम्	६	४	१२६
अर्वणस्त्रसावनञः	६	४	१२७
मघवा बहुलम्	६	४	१२८
भस्य	६	४	१२९
पादः पत्	६	४	१३०
वसोः संप्रसारणम्	६	४	१३१
वाह ऊठ्	६	४	१३२
श्वयुवमघोनामतद्धिते	६	४	१३३
अल्लोपोऽनः	६	४	१३४
षपूर्वहन्धृतराज्ञामणि	६	४	१३५

सूत्राणि।	अ०	पा०	सू०
विभाषा ङिश्योः	६	४	१३६
न संयोगाद्वमन्तात्	६	४	१३७
अचः	६	४	१३८
उद ईत्	६	४	१३९
आतो धातोः	६	४	१४०
मन्त्रेष्वाङ्यादेरात्मनः	६	४	१४१
ति विंशतेर्डिति	६	४	१४२
टेः	६	४	१४३
नस्तद्धिते	६	४	१४४
अह्नष्टखोरेव	६	४	१४५
ओर्गुणः	६	४	१४६
ढेलोपोऽकद्र्वाः	६	४	१४७
यस्येति च	६	४	१४८
सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः	६	४	१४९
हलस्तद्धितस्य	६	४	१५०
आपत्यस्य च तद्धितेऽनाति	६	४	१५१
क्यच्वयोश्च	६	४	१५२
विल्वकादिभ्यश्छस्य लुक्	६	४	१५३
तुरिष्ठेमेयःसु	६	४	१५४
टेः	६	४	१५५
स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः	६	४	१५६
प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वार्षिन्नपद्राघिवृन्दाः	६	४	१५७
बहोर्लोपो भू च बहोः	६	४	१५८
इष्ठस्य यिट् च	६	४	१५९
ज्यादादीयसः	६	४	१६०

सूत्राणि ।	अ०	पा०	सू०
रऋतो हलादेर्लघोः	६	४	१६१
विभाषर्जोरिछन्दसि	६	४	१६२
प्रकृत्यैकाच्	६	४	१६३
इनण्यनपत्ये	६	४	१६४
गाथिविदथिकेशिगाणिपाणि-नश्च	६	४	१६५
संयोगादिश्च	६	४	१६६
अन्	६	४	१६७
ये चाऽभावकर्मणोः	६	४	१६८
आत्माध्वानौ खे	६	४	१६९
न मपूर्वोऽपत्येऽवर्मणः	६	४	१७०
ब्राह्मोऽजातौ	६	४	१७१
कार्मस्ताच्छील्ये	६	४	१७२
औक्षमनपत्ये	६	४	१७३
दाण्डिनायनहास्तिनायना-थर्वणिकजैह्माशिनेयवा-शिनायनिभ्रौणहत्यधैवत्यसार-वैक्ष्वाकमैत्रेयहिरण्म-यानि	६	४	१७४
ऋत्व्यवास्त्व्यवास्त्वमाध्वी-हिरण्ययानि च्छन्दसि	६	४	१७५
अङ्गस्यराल्लोपोविङ्नोर्वाक्रोशमिणोहुझ-ल्भ्यस्थलिचमन्त्रेषुरऋतः पञ्चदश ॥ इति ष-ष्ठाध्यायस्य चतुर्थः पादः ॥ इति षष्ठाध्यायः समाप्तः ॥ ६ ॥ ॥ ॥			
युवोरनाकौ	७	१	१
आयनेयीनीयियः फढखछघां मत्ययादीनाम्	७	१	२
झोऽन्तः	७	१	३
अदभ्यस्ताव्	७	१	४
आत्मनेपदेष्वनतः	७	१	५

सूत्राणि ।	अ०	पा०	सू०
शीङो रुट्	७	१	६
वेत्तेर्विभाषा	७	१	७
बहुलं छन्दसि	७	१	८
अतो भिस ऐस्	७	१	९
बहुलं छन्दसि	७	१	१०
नेदमदसोरकोः	७	१	११
टाङसिङसामिनात्स्याः	७	१	१२
ङेर्यः	७	१	१३
सर्वनाम्नः स्मै	७	१	१४
ङसिङ्योः स्मात्स्मिनौ	७	१	१५
पूर्वादिभ्यो नवभ्यो वा	७	१	१६
जसः शी	७	१	१७
औङ आपः	७	१	१८
नपुंसकाच्च	७	१	१९
जश्शसोः शिः	७	१	२०
अष्टाभ्य औश्	७	१	२१
षड्भ्यो लुक्	७	१	२२
स्वमोर्नपुंसकात्	७	१	२३
अतोऽम्	७	१	२४
अदड्डतरादिभ्यः पञ्चभ्यः	७	१	२५
नेतराच्छन्दसि	७	१	२६
युष्मदस्मद्भ्यां ङसोऽश्	७	१	२७
ङे प्रथमयोरम्	७	१	२८
शसो न	७	१	२९
भ्यसोभ्यम्	७	१	३०
पञ्चम्या अत्	७	१	३१
एकवचनस्य च	७	१	३२
साम आकम्	७	१	३३
आत औ णलः	७	१	३४
तुह्योस्तातङाशिष्यन्यतर-			

सूत्राणि ।	अ०	पा०	सू०
स्यांम्	७	१	३५
विदेः शतुर्वसुः	७	१	३६
समासेऽनञ्पूर्वे क्त्वो ल्यप्	७	१	३७
क्त्वापि च्छन्दसि	७	१	३८
सुपां सुलुक्पूर्वसवर्णाच्छेयाडा-			
ड्यायाजालः	७	१	३९
अमो मश्	७	१	४०
लोपस्त आत्मनेपदेषु	७	१	४१
ध्वमो ध्वात्	७	१	४२
यजध्वैनमिति च	७	१	४३
तस्य ताव्	७	१	४४
तप्तनप्तनथनाश्च	७	१	४५
इदन्तोमसि	७	१	४६
क्त्वो यक्	७	१	४७
इष्टीनमिति च	७	१	४८
स्नात्व्यादयश्च	७	१	४९
आज्जसेरसुक्	७	१	५०
अश्वक्षीरवृषलवणानामात्मप्री-			
तौ क्यचि	७	१	५१
आमि सर्वनाम्नः सुट्	७	१	५२
त्रेस्त्रयः	७	१	५३
ह्रस्वनद्यापो नुट्	७	१	५४
षट्चतुर्भ्यश्च	७	१	५५
श्रीग्रामण्योश्छन्दसि	७	१	५६
गोः पादान्ते	७	१	५७
इदितो नुम् धातोः	७	१	५८
शे मुचादीनाम्	७	१	५९
मस्जिनशोर्झलि	७	१	६०
रधिजभोरचि	७	१	६१
नेटयलिटि रधेः	७	१	६२
रभेरशव्लिटोः	७	१	६३

सूत्राणि ।	अ०	पा०	सू०
लभेश्च	७	१	६४
आङो यि	७	१	६५
उपात्प्रशंसायाम्	७	१	६६
उपसर्गात् खल्घञोः	७	१	६७
न सुदुर्भ्यां केवलाभ्याम्	७	१	६८
विभाषा चिण्णमुलोः	७	१	६९
उगिदचां सर्वनामस्थानेऽ-			
धातोः	७	१	७०
युजेरसमासे	७	१	७१
नपुंसकस्य झलचः	७	१	७२
इकोऽचि विभक्तौ	७	१	७३
तृतीयादिषु भाषितपुंस्कं पुंव-			
द्भालवस्य	७	१	७४
अस्थिदधिसक्थ्यक्ष्णामनङुदा-			
त्तः	७	१	७५
छन्दस्यपि दृश्यते	७	१	७६
ई च द्विवचने	७	१	७७
नाभ्यस्ताच्छतुः	७	१	७८
वा नपुंसकस्य	७	१	७९
आच्छीनद्योर्नुम्	७	१	८०
शपूश्यनोर्नित्यम्	७	१	८१
सावनडुहः	७	१	८२
दृक्स्ववःस्वतवसां छन्दसि	७	१	८३
दिव औत्	७	१	८४
पथिमथ्यृभुक्षामात्	७	१	८५
इतोऽत्सर्वनामस्थाने	७	१	८६
थो न्थः	७	१	८७
भस्य टेर्लोपः	७	१	८८
पुंसोऽसुङ्	७	१	८९
गोतो णित्	७	१	९०
णलुत्तमो वा	७	१	९१

सूत्राणि।	अ०	पा०	सू०
सख्युरसम्बुद्धौ	७	१	९२
अनङ् सौ	७	१	९३
ऋदुशनस्पुरुदंसोऽनेहसां च	७	१	९४
तुज्वद् क्रोष्टुः	७	१	९५
स्त्रियां च	७	१	९६
विभाषा तृतीयादिष्वचि	७	१	९७
चतुरनडुहोरामुदात्तः	७	१	९८
अम् संबुद्धौ	७	१	९९
ऋत इद्धातोः	७	१	१००
उपधायाश्च	७	१	१०१
उदोष्ठ्यपूर्वस्य	७	१	१०२
वह्वुलं छन्दसि	७	१	१०३
युवोरष्टाभ्योलोपस्तरधिजभोशपूदयनोरुपधायाश्चीणिं ॥ इति सप्तमाध्यायस्य प्रथमः पादः ॥ १ ॥			
सिचि वृद्धिः परस्मैपदेषु	७	२	१
अतो लरान्तस्य	७	२	२
वदव्रजहलन्तस्याचः	७	२	३
नेटि	७	२	४
क्ष्यन्तक्षणश्वसजागृणिश्व्येदिताम्	७	२	५
ऊर्णोतेर्विभाषा	७	२	६
अतो हलादेर्लघोः	७	२	७
नेडाशि कृति	७	२	८
तितुत्रतथसिसुसरकसेषु च	७	२	९
एकाच उपदेशेऽनुदात्तात्	७	२	१०
श्युकः किति	७	२	११
सनि ग्रहगुहोश्च	७	२	१२
कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि	७	२	१३
श्वीदितो निष्ठायाम्	७	२	१४
यस्य विभाषा	७	२	१५
आदितश्च	७	२	१६

सूत्राणि।	अ०	पा०	सू०
विभाषा भावादिकर्मणोः	७	२	१७
क्षुब्धस्वान्तध्वान्तलग्नम्लिष्ट-विरिब्धफाण्टवाढानि मन्थ-मनस्तमःसक्ताऽविस्पष्ट-स्वरानायासभृशेषु	७	२	१८
धृषिशसी वैयात्ये	७	२	१९
दृढः स्थूलबलयोः	७	२	२०
प्रभौ परिवृढः	७	२	२१
कृच्छ्रगहनयोः कषः	७	२	२२
घुषिरविशब्दने	७	२	२३
अर्देः संनिविभ्यः	७	२	२४
अभेश्चाविदूर्ये	७	२	२५
णेरध्ययने वृत्तम्	७	२	२६
वा दान्तशान्तपूर्णदस्तस्पष्ट-च्छन्नज्ञप्ताः	७	२	२७
रुष्यमत्वरसंघुषाऽऽस्वनाम्	७	२	२८
ह्रषेर्लोमसु	७	२	२९
अपचितश्च	७	२	३०
हु ह्वरेश्छन्दसि	७	२	३१
अपरिह्वृताश्च	७	२	३२
सोमे ह्वरितः	७	२	३३
ग्रसितस्कभितस्तभितोत्तभितत्तवत्तविकस्ताविशस्तृशंस्तृ-शास्तृतरुतृतरूतृवरुतृवरूतृ-वरूत्रीरुज्ज्वलितिक्षरि-तिवमित्यमितीति च	७	२	३४
आर्धधातुकस्येड्वलादेः	७	२	३५
श्नुक्रमोरात्मनेपदनिमित्ते	७	२	३६
ग्रहोऽलिटि दीर्घः	७	२	३७
वृतो वा	७	२	३८
न लिङि	७	२	३९

सूत्राणि ।	अ०	पा०	सू०
सिचि च परस्मैपदेषु	७	२	४०
इट् सनि वा	७	२	४१
लिङ्सिचोरात्मनेपदेषु	७	२	४२
ऋतश्च संयोगादेः	७	२	४३
स्वरतिसूतिसूयतिधूञूदितो वा	७	२	४४
रधादिभ्यश्च	७	२	४५
निरः कुषः	७	२	४६
इणो निष्ठायाम्	७	२	४७
तीषसहलुभरुषरिषः	७	२	४८
सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृ-यूर्णुभरज्ञपिसनाम्	७	२	४९
क्ङिशः क्त्वानिष्ठयोः	७	२	५०
पूङश्च	७	२	५१
वंसतिक्षुधोरिट्	७	२	५२
अञ्चेः पूजायाम्	७	२	५३
लुभो विमोहने	७	२	५४
जॄव्रश्च्योः क्त्वि	७	२	५५
उदितो वा	७	२	५६
सेऽसिचि कृतचृतछृदतृदनृतः	७	२	५७
गमेरिट् परस्मैपदेषु	७	२	५८
न वृद्भ्यश्चतुर्भ्यः	७	२	५९
तासि च क्लृपः	७	२	६०
अचस्तास्वत्थल्यनिटो नित्यम्	७	२	६१
उपदेशेऽत्वतः	७	२	६२
ऋतो भारद्वाजस्य	७	२	६३
बभूथाततन्थजगृम्भववर्थेति निगमे	७	२	६४
विभाषा सृजिदृशोः	७	२	६५
इडत्यर्तिव्ययतीनाम्	७	२	६६

सूत्राणि ।	अ०	पा०	सू०
वस्वेकाजाद्घसाम्	७	२	६७
विभाषा गमहनविदविशाम्	७	२	६८
सनिंससनिवांसम्	७	२	६९
ऋद्धनोः स्ये	७	२	७०
अञ्जेः सिचि	७	२	७१
स्तुसुधूञ्भ्यः परस्मैपदेषु	७	२	७२
यमरमनमाऽऽतां सक् च	७	२	७३
स्मिपूङ्रञ्ज्वशां सनि	७	२	७४
किरश्च पञ्चभ्यः	७	२	७५
रुदादिभ्यः सार्वधातुके	७	२	७६
ईशः से	७	२	७७
ईडजनोर्ध्वे च	७	२	७८
लिङः सलोपोऽनन्त्यस्य	७	२	७९
अतो येयः	७	२	८०
आतो ङितः	७	२	८१
आने मुक्	७	२	८२
ईदासः	७	२	८३
अष्टन आ विभक्तौ	७	२	८४
रायो हलि	७	२	८५
युष्मदस्मदोरनादेशे	७	२	८६
द्वितीयायां च	७	२	८७
यथमायाश्च द्विवचने भाषायाम्	७	२	८८
योऽचि	७	२	८९
शेषे लोपः	७	२	९०
मपर्यन्तस्य	७	२	९१
युवावौ द्विवचने	७	२	९२
यूयवयौ जसि	७	२	९३
त्वाहौ सौ	७	२	९४
तुभ्यमह्यौ ङयि	७	२	९५
तवममौ ङसि	७	२	९६

सूत्राणि।	अ०	पा०	सू०
त्वमावेकवचने	७	२	९७
प्रत्ययोत्तरपदयोश्च	७	२	९८
त्रिचतुरोः स्त्रियां तिसृचतसृ	७	२	९९
अचि र ऋतः	७	२	१००
जराया जरसन्यतरस्याम्	७	२	१०१
त्यदादीनामः	७	२	१०२
किमः कः	७	२	१०३
कु तिहोः	७	२	१०४
कौति	७	२	१०५
तदोः सः सावनन्त्ययोः	७	२	१०६
अदस औ सुलोपश्च	७	२	१०७
इदमो मः	७	२	१०८
दश्च	७	२	१०९
यः सौ	७	२	११०
इदोऽय् पुंसि	७	२	१११
अनाप्यकः	७	२	११२
हलि लोपः	७	२	११३
मृजेर्वृद्धिः	७	२	११४
अचो ञ्णिति	७	२	११५
अत उपधायाः	७	२	११६
तद्धितेष्वचामादेः	७	२	११७
किति च	७	२	११८
सिचिप्रभाविट्सन्यचआतोजरायाअष्टादश॥			
इति सप्तमाध्यायस्य द्वितीयः पादः ॥ २ ॥			
देविकाशिंशपादित्यवाड्दीर्घ-सत्रश्रेयसामात्	७	३	१
केकयमित्रयुप्रलयानां यादे-रियः	७	३	२
नद्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्	७	३	३
द्वारादीनां च	७	३	४
न्यग्रोधस्य च केवलस्य	७	३	५
न कर्मव्यतिहारे	७	३	६
स्वागतादीनां च	७	३	७
स्वादेरिञि	७	३	८
पदान्तस्यान्यतरस्याम्	७	३	९
उत्तरपदस्य	७	३	१०
अवयवाद्ततोः	७	३	११
सुसर्वार्द्धाज्जनपदस्य	७	३	१२
दिशोऽमद्राणाम्	७	३	१३
प्राचां ग्रामनगराणाम्	७	३	१४
संख्यायाःसंवत्सरसंख्यस्य च	७	३	१५
वर्षस्याभविष्यति	७	३	१६
परिमाणान्तस्यासंज्ञाशाणयोः	७	३	१७
ने प्रोष्ठपदानाम्	७	३	१८
हृद्भगसिन्ध्वन्ते पूर्वपदस्य च	७	३	१९
अनुशतिकादीनां च	७	३	२०
देवताद्वन्द्वे च	७	३	२१
नेन्द्रस्य परस्य	७	३	२२
दीर्घाच्च वरुणस्य	७	३	२३
प्राचां नगरान्ते	७	३	२४
जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्	७	३	२५
अर्द्धात्परिमाणस्य पूर्वस्य तु वा	७	३	२६
नातः परस्य	७	३	२७
प्रवाहणस्य ढे	७	३	२८
तत्प्रत्ययस्य च	७	३	२९
नञः शुचीश्वरक्षेत्रज्ञकुशल-निपुणानाम्	७	३	३०
यथातथयथापुरयोः पर्यायेण	७	३	३१
हनस्तोऽचिण्णलोः	७	३	३२

सूत्राणि।	अ०	पा०	सू०
आतो युक् चिण्कृतोः	७	३	३३
नोदात्तोपदेशस्य मान्तस्याऽ-नाचमेः	७	३	३४
जनिवध्योश्च	७	३	३५
अतिंह्रीङ्लीरीक्नूयीक्ष्माय्या-तां पुङ्णौ	७	३	३६
शाच्छासाह्वाव्यावेपां युक्	७	३	३७
वो विधूनने जुक्	७	३	३८
लीलोर्नुग्लुकावन्यतरस्यां स्नेह-विपातने	७	३	३९
भियो हेतुभये षुक्	७	३	४०
स्फायो वः	७	३	४१
शदेरगतौ तः	७	३	४२
रुहः पोऽन्यतरस्याम्	७	३	४३
मत्ययस्थात्कात्पूर्वस्यात इदा-प्यसुपः	७	३	४४
न यासयोः	७	३	४५
उदीचामातः स्थाने यक-पूर्वायाः	७	३	४६
भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वा-णामपि	७	३	४७
अभाषितपुंस्काच्च	७	३	४८
आदाचार्याणाम्	७	३	४९
ठस्येकः	७	३	५०
इसुसुक्तान्तात्कः	७	३	५१
चजोः कु घिण्ण्यतोः	७	३	५२
न्यङ्क्वादीनां च	७	३	५३
हो हन्तेर्ञ्णिन्नेषु	७	३	५४
अभ्यासाच्च	७	३	५५
हेरचङि	७	३	५६
सन्लिटोर्जेः	७	३	५७

सूत्राणि।	अ०	पा०	सू०
विभाषा चेः	७	३	५८
न क्वादेः	७	३	५९
अनिव्रज्योश्च	७	३	६०
भुजन्युञ्जौ पाण्युपतापयोः	७	३	६१
मयाजानुयाजौ यज्ञाङ्गे	७	३	६२
वश्चेर्गतौ	७	३	६३
ओकः उचः के	७	३	६४
ण्यं आवश्यके	७	३	६५
यजयाचरुचप्रवचर्चश्च	७	३	६६
वचोऽशब्दसंज्ञायाम्	७	३	६७
प्रयोज्यनियोज्यौ शक्यार्थे	७	३	६८
भोज्यं भक्ष्ये	७	३	६९
घोर्लोपो लेटि वा	७	३	७०
ओतः श्यनि	७	३	७१
क्सस्याचि	७	३	७२
लुग्वा दुहादिहलिहगुहामात्मने-पदे दन्त्ये	७	३	७३
शमामष्टानां दीर्घः श्यनि	७	३	७४
ष्ठिवुक्लमुचमां शिति	७	३	७५
क्रमः परस्मैपदेषु	७	३	७६
इषुगमियमां छः	७	३	७७
पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिश-दसदां पिबजिघ्रधमतिष्ठमनयच्छप-श्यर्च्छधौशीयसीदाः	७	३	७८
ज्ञाजनोर्जा	७	३	७९
प्वादीनां ह्रस्वः	७	३	८०
मीनातेर्निगमे	७	३	८१
मिदेर्गुणः	७	३	८२
जुसि च	७	३	८३
सार्वधातुकार्धधातुकयोः	७	३	८४
जाग्रोऽविचिण्णल्ङित्सु	७	३	८५

सूत्राणि ।	अ०	पा०	सू०
पुगन्तलघूपधस्य च	७	३	८६
नाभ्यस्तस्याऽचि पिति सार्वधातुके	७	३	८७
भूसुवोस्तिङि	७	३	८८
उतो वृद्धिर्लुकि हलि	७	३	८९
ऊर्णोतेर्विभाषा	७	३	९०
गुणोऽपृक्ते	७	३	९१
तृणह इम्	७	३	९२
ध्रुव ईट्	७	३	९३
यङो वा	७	३	९४
तुरुस्तुशम्यमः सार्वधातुके	७	३	९५
अस्तिसिचोऽपृक्ते	७	३	९६
बहुलं छन्दसि	७	३	९७
रुदश्च पञ्चभ्यः	७	३	९८
अङ्गार्यगालवयोः	७	३	९९
अदः सर्वेषाम्	७	३	१००
अतो दीर्घो यञि	७	३	१०१
सुपि च	७	३	१०२
बहुवचने झल्येत्	७	३	१०३
ओसि च	७	३	१०४
आङि चापः	७	३	१०५
संबुद्धौ च	७	३	१०६
अम्बार्थनद्योर्ह्रस्वः	७	३	१०७
ह्रस्वस्य गुणः	७	३	१०८
जसि च	७	३	१०९
ऋतो ङिसर्वनामस्थानयोः	७	३	११०
वेर्ङिति	७	३	१११
आण् नद्याः	७	३	११२
याडापः	७	३	११३
सर्वनाम्नः स्याड्ढ्रस्वश्च	७	३	११४
विभाषा द्वितीयातृतीया-			

सूत्राणि ।	अ०	पा०	सू०
भ्याम्	७	३	११५
ङेराम्नद्यामीभ्यः	७	३	११६
इदुद्भ्याम्	७	३	११७
औत्	७	३	११८
अच्च घेः	७	३	११९
आङो नाऽस्त्रियाम्	७	३	१२०
देविकादेवतास्फायोभुजमीनातेरतोदीर्घो-			
विंशतिः ॥ ॥ इति सप्तमाध्यायस्य			
तृतीयः पादः ॥ ३ ॥			
णौ चङ्युपधाया ह्रस्वः	७	४	१
नाग्लोपिशास्वृदिताम्	७	४	२
भ्राजभासभाषदीपजीवमील-			
पीडामन्यतरस्याम्	७	४	३
लोपः पिबतेरीच्चाभ्यासस्य	७	४	४
तिष्ठतेरित्	७	४	५
जिघ्रतेर्वा	७	४	६
उर्ऋत्	७	४	७
नित्यं छन्दसि	७	४	८
दयतेर्दिगि लिटि	७	४	९
ऋतश्च संयोगादेर्गुणः	७	४	१०
ऋच्छत्यृताम्	७	४	११
शृदृभ्रां ह्रस्वो वा	७	४	१२
केणः	७	४	१३
न कपि	७	४	१४
आपोऽन्यतरस्याम्	७	४	१५
ऋदृशोऽङि गुणः	७	४	१६
अस्यतेस्थुक्	७	४	१७
श्वयतेरः	७	४	१८
पतः पुम्	७	४	१९
वच उम्	७	४	२०
शीङः सार्वधातुके गुणः	७	४	२१

सूत्राणि।	अ०	पा०	सू०
अयङ्यि क्ङिति	७	४	२२
उपसर्गाद् ह्रस्व ऊहतेः	७	४	२३
एतेर्लिङि	७	४	२४
अकृत्सार्वधातुकयोर्दीर्घः	७	४	२५
च्वौ च	७	४	२६
रीङ् ऋतः	७	४	२७
रिङ्शयग्लिङ्क्षु	७	४	२८
गुणोऽर्तिसंयोगाद्योः	७	४	२९
यङि च	७	४	३०
ई घ्राध्मोः	७	४	३१
अस्य च्वौ	७	४	३२
क्यचि च	७	४	३३
अशनायोदन्यधनाया बुभुक्षा-पिपासागर्द्धेषु	७	४	३४
न च्छन्दस्यपुत्रस्य	७	४	३५
दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति	७	४	३६
अश्वाघस्यात्	७	४	३७
देवसुम्नयोर्यजुषि काठके	७	४	३८
कव्यध्वरपृतनस्यर्चि लोपः	७	४	३९
द्यतिस्यतिमास्थामित्तिकिति	७	४	४०
शाच्छोरन्यतरस्याम्	७	४	४१
दधातेर्हि	७	४	४२
जहातेश्च क्त्वि	७	४	४३
विभाषा छन्दसि	७	४	४४
सुधितवसुधितनेमधितधिष्व-धिषीय च	७	४	४५
दोदद्घोः	७	४	४६
अच उपसर्गात्तः	७	४	४७
अपो भि	७	४	४८
सः स्याऽऽर्द्धधातुके	७	४	४९

सूत्राणि।	अ०	पा०	सू०
तासस्त्योर्लोपः	७	४	५०
रि च	७	४	५१
ह एति	७	४	५२
यीवर्णयोर्दिधीवेव्योः	७	४	५३
सनि मीमाघुरभलभशकपतप-दामच इसू	७	४	५४
आज्ञप्यृधामीत्	७	४	५५
दम्भ इच्च	७	४	५६
मुचोऽकर्मकस्य गुणो वा	७	४	५७
अत्र लोपोऽभ्यासस्य	७	४	५८
ह्रस्वः	७	४	५९
हलादिः शेषः	७	४	६०
शर्पूर्वाः खयः	७	४	६१
कुहोश्चुः	७	४	६२
न कवतेर्यङि	७	४	६३
कृपेरच्छन्दसि	७	४	६४
दाधर्तिदर्धर्तिदर्धर्षिपेबोभूतु ते-तिक्तेऽलर्ज्यार्ऽऽपनीफणत्सं-सनिष्यदत्करिक्रत्कनिक्र-दद्भरिभ्रद्दविध्वतो दवि-द्युतत्तरित्रतः सरी-सृपतंवरीवृजन्मर्मृज्याऽऽ-गनीगन्तीति च	७	४	६५
उरत्	७	४	६६
द्युतिस्वाप्योः संप्रसारणम्	७	४	६७
व्यथो लिटि	७	४	६८
दीर्घ इणः किति	७	४	६९
अत आदेः	७	४	७०
तस्माच्छुड् ढिहलः	७	४	७१
अश्नोतेश्च	७	४	७२
भवतेरः	७	४	७३

सूत्राणि ।	अ० पा० सू०
ससूवेति निगमे	७ । ४ । ७४
णिजां त्रयाणां गुणः श्लौ	७ । ४ । ७५
भृञामित्	७ । ४ । ७६
अर्तिपिपर्त्योश्च	७ । ४ । ७७
बहुलं छन्दसि	७ । ४ । ७८
सन्यतः	७ । ४ । ७९
ओः पुयण्ज्यपरे	७ । ४ । ८०
स्रवतिशृणोतिद्रवतिप्रवति-प्लवतिच्यवतीनां वा	७ । ४ । ८१
गुणो यङ्लुकोः	७ । ४ । ८२
दीर्घोऽकितः	७ । ४ । ८३
नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपद-स्कन्दाम्	७ । ४ । ८४
नुगतोऽनुनासिकान्तस्य	७ । ४ । ८५
जपजभदहदशभञ्जपशां च	७ । ४ । ८६
चरफलोश्च	७ । ४ । ८७
उत्परस्यातः	७ । ४ । ८८
ति च	७ । ४ । ८९
रीगृदुपधस्य च	७ । ४ । ९०
रुग्रिकौ च लुकि	७ । ४ । ९१
ऋतश्च	७ । ४ । ९२
सन्वल्लघुनि चङ्परेऽन-ग्लोपे	७ । ४ । ९३
दीर्घो लघोः	७ । ४ । ९४
अत्स्मृदृत्वरप्रथम्रदस्तॄस्प-शाम्	७ । ४ । ९५
विभाषा वेष्टिचेष्ट्योः	७ । ४ । ९६
ईड् च गणः	७ । ४ । ९७
णौचङ्शीङः शाच्छोः शर्पूर्वाः स्रवति सप्त-दश ॥ इति सप्तमाध्यायस्य चतुर्थः पादः॥ ॥ ४ ॥ इति सप्तमाध्यायः समाप्तः ॥७॥	

सूत्राणि ।	अ० पा० सू०
अथाष्टमाध्यायप्रारम्भः ।	
सर्वस्य द्वे	८ । १ । १
तस्य परमाम्रेडितम्	८ । १ । २
अनुदात्तं च	८ । १ । ३
नित्यवीप्सयोः	८ । १ । ४
परेर्वर्जने	८ । १ । ५
प्रसमुपोदः पादपूरणे	८ । १ । ६
उपर्यध्यधसः सामीप्ये	८ । १ । ७
वाक्यादेरामन्त्रितस्यासूयासम्मति-कोपकुत्सनभर्त्सनेषु	८ । १ । ८
एकं बहुव्रीहिवत्	८ । १ । ९
आबाधे च	८ । १ । १०
कर्मधारयवदुत्तरेषु	८ । १ । ११
प्रकारे गुणवचनस्य	८ । १ । १२
अकृच्छ्रे प्रियसुखयोरन्यतर-स्याम्	८ । १ । १३
यथास्वे यथायथम्	८ । १ । १४
द्वन्द्वं रहस्यमर्यादावचनव्यु-त्क्रमणयज्ञपात्रप्रयोगा-भिव्यक्तिषु	८ । १ । १५
पदस्य	८ । १ । १६
पदात्	८ । १ । १७
अनुदात्तं सर्वमपादादौ	८ । १ । १८
आमन्त्रितस्य च	८ । १ । १९
युष्मदस्मदोः षष्ठीचतुर्थीद्वि-तीयास्थयोर्वान्नावौ	८ । १ । २०
बहुवचनस्य वस्नसौ	८ । १ । २१
तेमयावेकवचनस्य	८ । १ । २२
त्वामौ द्वितीयायाः	८ । १ । २३
न चवाहाहैवयुक्ते	८ । १ । २४
पश्यार्थैश्चानालोचने	८ । १ । २५

सूत्राणि।	अ० पा० सू०
सपूर्वायाः प्रथमाया विभाषा	८ । १ । २६
तिङो गोत्रादीनि कुत्सनाभी- क्ष्ण्ययोः	८ । १ । २७
तिङ्ङतिङः	८ । १ । २८
न लुट्	८ । १ । २९
निपातैर्यद्यदिहन्तकुविन्नेच्चेच्च- णूकच्चिद्यत्रयुक्तम्	८ । १ । ३०
नह प्रत्यारम्भे	८ । १ । ३१
सत्यं प्रश्ने	८ । १ । ३२
अङ्गात्प्रातिलोम्ये	८ । १ । ३३
हि च	८ । १ । ३४
छन्दस्यनेकमपि साकाङ्क्षम्	८ । १ । ३५
यावद्यथाभ्याम्	८ । १ । ३६
पूजायां नानन्तरम्	८ । १ । ३७
उपसर्गव्यपेतं च	८ । १ । ३८
तुपश्यपश्यताऽहैः पूजायाम्	८ । १ । ३९
अहो च	८ । १ । ४०
शेषे विभाषा	८ । १ । ४१
पुरा च परीप्सायाम्	८ । १ । ४२
नन्वित्यनुज्ञैषणायाम्	८ । १ । ४३
किंक्रियाप्रश्नेऽनुपसर्गममति- षिद्धम्	८ । १ । ४४
लोपे विभाषा	८ । १ । ४५
एहिमन्ये प्रहासे लट् जात्वपूर्वम्	८ । १ । ४७
किंवृत्तं च चिदुत्तरम्	८ । १ । ४८
आहो उताहो चाऽनन्तरम्	८ । १ । ४९
शेषे विभाषा	८ । १ । ५०
गत्यर्थलोटा लृण्न चेत्कारकं स- र्वान्यत्	८ । १ । ५१
लोट् च	८ । १ । ५२

सूत्राणि।	अ० पा० सू०
विभाषितं सोपसर्गमनुत्तमम्	८ । १ । ५३
हन्त च	८ । १ । ५४
आम एकान्तरमामन्त्रितमन- न्तिके	८ । १ । ५५
यद्धितुपरं छन्दसि	८ । १ । ५६
चनचिदिवगोत्रादितद्धिताम्रे- डितेष्वगतेः	८ । १ । ५७
चादिषु च	८ । १ । ५८
चवायोगे प्रथमा	८ । १ । ५९
हेति क्षियायाम्	८ । १ । ६०
अहेति विनियोगे च	८ । १ । ६१
चाहलोप एवेत्यवधारणम्	८ । १ । ६२
चादिलोपे विभाषा	८ । १ । ६३
वैवावेति च च्छन्दसि	८ । १ । ६४
एकान्याभ्यां समर्थाभ्याम्	८ । १ । ६५
यद्वृत्तान्नित्यम्	८ । १ । ६६
पूजनात्पूजितमनुदात्तं काष्ठा- दिभ्यः	८ । १ । ६७
सगतिरपि तिङ्	८ । १ । ६८
कुत्सने च सुप्यगोत्रादौ	८ । १ । ६९
गतिर्गतौ	८ । १ । ७०
तिङि चोदात्तवति	८ । १ । ७१
आमन्त्रितं पूर्वमविद्यमानवत्	८ । १ । ७२
नामन्त्रिते समानाधिकरणे सामान्यवचनम्	८ । १ । ७३
विभाषितं विशेषवचने	८ । १ । ७४
सर्वस्यबहुवचनस्यशेषेऽहेति चतुर्दश॥ इत्य- ष्टमाध्यायस्य प्रथमः पादः ॥ १ ॥	
पूर्वत्रासिद्धम्	८ । २ । १
नलोपः सुप्स्वरसंज्ञातुग्विधि- षु कृति	८ । २ । २

सूत्राणि ।	अ०	पा०	सू०
न मुने	८	२	३
उदात्तस्वरितयोर्यणः स्वरि-तोऽनुदात्तस्य	८	२	४
एकादेश उदात्तेनोदात्तः	८	२	५
स्वरितो वानुदात्ते पदादौ	८	२	६
न लोपः प्रातिपदिकान्तस्य	८	२	७
न डिसंबुद्ध्योः	८	२	८
मादुपधायाश्च मतोर्वोऽयवा-दिभ्यः	८	२	९
झयः	८	२	१०
संज्ञायाम्	८	२	११
आसन्दीवदष्ठीवच्चक्रीवत्कक्षी-वद्ब्रुमण्वच्चर्मण्वती	८	२	१२
उदन्वानुदधौ च	८	२	१३
राजन्वान् सौराज्ये	८	२	१४
छन्दसीरः	८	२	१५
अनो नुट्	८	२	१६
नादूघस्य	८	२	१७
कृपो रो लः	८	२	१८
उपसर्गस्यायतौ	८	२	१९
ग्रो यङि	८	२	२०
अचि विभाषा	८	२	२१
परेश्च घाङ्कयोः	८	२	२२
संयोगान्तस्य लोपः	८	२	२३
रात्सस्य	८	२	२४
धि च	८	२	२५
झलो झलि	८	२	२६
ह्रस्वादङ्गात्	८	२	२७
इट ईटि	८	२	२८
स्कोः संयोगाद्योरन्ते च	८	२	२९
चोः कुः	८	२	३०

सूत्राणि।	अ०	पा०	सू०
हो ढः	८	२	३१
दादेर्धातोर्घः	८	२	३२
वा द्रुहमुहष्णुहष्णिहाम्	८	२	३३
नहो धः	८	२	३४
आहस्थः	८	२	३५
व्रश्चभ्रस्जसृजमृजयजराजभ्रा-जछशां षः	८	२	३६
एकाचो बशो भष् झषन्तस्य स्ध्वोः	८	२	३७
दधस्तथोश्च	८	२	३८
झलां जशोऽन्ते	८	२	३९
झषस्तथोर्धोऽधः	८	२	४०
षढोः कः सि	८	२	४१
रदाभ्यां निष्ठातो नः पूर्वस्य च दः	८	२	४२
संयोगादेरातो धातोर्यण्वतः	८	२	४३
ल्वादिभ्यः	८	२	४४
ओदितश्च	८	२	४५
क्षियो दीर्घात्	८	२	४६
श्योऽस्पर्शे	८	२	४७
अञ्चोऽनपादाने	८	२	४८
दिवोऽविजिगीषायाम्	८	२	४९
निर्वाणोऽवाते	८	२	५०
शुषः कः	८	२	५१
पचो वः	८	२	५२
क्षायो मः	८	२	५३
अस्त्योऽन्यतरस्याम्	८	२	५४
अनुपसर्गाद्फुल्लक्षीबकृशो-ल्लाघाः	८	२	५५
नुदविदोन्दत्राघ्राहीभ्योऽन्यत-रस्याम्	८	२	५६

सूत्राणि।	अ०	पा०	सू०
न ध्याख्यापॄमूर्च्छिमदाम्	८	२	५७
वित्तो भोगप्रत्यययोः	८	२	५८
भित्तं शकलम्	८	२	५९
ऋणमाधमर्ण्ये	८	२	६०
नसत्तनिषत्तानुत्तप्रतूर्त्तसूर्तगूर्त्तानि च्छन्दसि	८	२	६१
क्किन्प्रत्ययस्य कुः	८	२	६२
नशेर्वा	८	२	६३
मो नो धातोः	८	२	६४
म्वोश्च	८	२	६५
ससजुषो रुः	८	२	६६
अवयाः श्वेतवाः पुरोडाश्च	८	२	६७
अहन्	८	२	६८
रोऽसुपि	८	२	६९
अम्नरू धरवरित्युभयथा छन्दसि	८	२	७०
भुवश्च महाव्याहृतेः	८	२	७१
वसुस्रंसुध्वंस्वनड्वहां दः	८	२	७२
तिप्यनस्तेः	८	२	७३
सिपि धातो रुर्वा	८	२	७४
दश्च	८	२	७५
वोरुपधाया दीर्घ इकः	८	२	७६
हलि च	८	२	७७
उपधायां च	८	२	७८
न भकुर्छुराम्	८	२	७९
अदसोऽसेर्दादु दो मः	८	२	८०
एत ईद्बहुवचने	८	२	८१
वाक्यस्य टेः प्लुत उदात्तः	८	२	८२
प्रत्यभिवादेऽशूद्रे	८	२	८३
दूराद्धूते च	८	२	८४
हैहेप्रयोगे हैहयोः	८	२	८५

सूत्राणि।	अ०	पा०	सू०
गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्	८	२	८६
ओमभ्यादाने	८	२	८७
ये यज्ञकर्मणि	८	२	८८
प्रणवष्टेः	८	२	८९
याज्यान्तः	८	२	९०
ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः	८	२	९१
अग्नीत्प्रेषणे परस्य च	८	२	९२
विभाषा पृष्टप्रतिवचनेहेः	८	२	९३
निगृह्यानुयोगे च	८	२	९४
आम्रेडितं भर्त्सने	८	२	९५
अङ्गयुक्तं तिङाकाङ्क्षम्	८	२	९६
विचार्यमाणानाम्	८	२	९७
पूर्वं तु भाषायाम्	८	२	९८
प्रतिश्रवणे च	८	२	९९
अनुदात्तं प्रश्नान्ताभिपूजितयोः	८	२	१००
चिदिति चोपमार्थे प्रयुज्यमाने	८	२	१०१
उपरिस्विदासीदिति च	८	२	१०२
स्वरितमाम्रेडितेऽसूयासम्मतिकोपकुत्सनेषु	८	२	१०३
क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्	८	२	१०४
अनन्त्यस्यापि प्रश्नाख्यानयोः	८	२	१०५
प्लुतावैच इदुतौ	८	२	१०६
एचोऽप्रगृह्यस्यादूराद्धूतेपूर्वस्यार्द्धस्याऽऽदुत्तरस्येदुतौ	८	२	१०७

सूत्राणि ।	अ०	पा०	सू०
तयोर्य्वावचि संहितायाम्	८	२	१०८
पूर्वत्राचिषढोर्नसत्तैताश्चिदित्यष्टौ ॥			
इत्यष्टमाध्यायस्य द्वितीयः पादः ॥ २ ॥			
मतुवसोरु संबुद्धौ छन्दसि	८	३	१
अत्रानुनासिकः पूर्वस्य तु वा	८	३	२
आतोऽटि नित्यम्	८	३	३
अनुनासिकात्परोऽनुस्वारः	८	३	४
समः सुटि	८	३	५
पुमः खय्यम्परे	८	३	६
नश्छव्यप्रशान्	८	३	७
उभयथर्क्षु	८	३	८
दीर्घादटि समानपादे	८	३	९
नूनंपे	८	३	१०
स्वतवान्पायौ	८	३	११
कानाम्रेडिते	८	३	१२
ढो ढे लोपः	८	३	१३
रो रि	८	३	१४
खरवसानयोर्विसर्जनीयः	८	३	१५
रोः सुपि	८	३	१६
भोभगोअघो अपूर्वस्य योऽशि	८	३	१७
ह्योर्लोपमयत्नतरः शाकटायनस्य	८	३	१८
लोपः शाकल्यस्य	८	३	१९
ओतो गार्ग्यस्य	८	३	२०
उञि च पदे	८	३	२१
हलि सर्वेषाम्	८	३	२२
मोऽनुस्वारः	८	३	२३
नश्चापदान्तस्य झलि	८	३	२४
मो राजि समः क्वौ	८	३	२५
हे मपरे वा	८	३	२६

सूत्राणि ।	अ०	पा०	सू०
नपरे नः	८	३	२७
ङ्णोः कुक् टुक् शरि	८	३	२८
डः सि धुट्	८	३	२९
नश्च	८	३	३०
शि तुक्	८	३	३१
ङमो ह्रस्वादचि ङमुण्नित्यम्	८	३	३२
मय उञो वो वा	८	३	३३
विर्जनीयस्य सः	८	३	३४
शर्परे विसर्जनीयः	८	३	३५
वा शरि	८	३	३६
कुप्वोः ᳚क ᳚पौ च	८	३	३७
सोऽपदादौ	८	३	३८
इणः षः	८	३	३९
नमस्पुरसोर्गत्योः	८	३	४०
इदुदुपधस्य चाऽप्रत्ययस्य	८	३	४१
तिरसोऽन्यतरस्याम्	८	३	४२
द्विस्त्रिश्चतुरिति कृत्वोऽर्थे	८	३	४३
इसुसोः सामर्थ्ये	८	३	४४
नित्यं समासेऽनुत्तरपदस्थस्य	८	३	४५
अतः कृकमिकंसकुम्भपात्र-कुशाकर्णीष्वनव्ययस्य	८	३	४६
अधःशिरसी पदे	८	३	४७
कस्कादिषु च	८	३	४८
छन्दसि वाऽप्राम्रेडितयोः	८	३	४९
कः करत्करतिकृधिकृतेष्वनदितेः	८	३	५०
पञ्चम्याः परावध्यर्थे	८	३	५१
पातौ च बहुलम्	८	३	५२
षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु	८	३	५३

सूत्राणि ।	अ० पा० सू०
इडाया वा	८ । ३ । ५४
अपदान्तस्य मूर्द्धन्यः	८ । ३ । ५५
सहेः साडः सः	८ । ३ । ५६
इणकोः	८ । ३ । ५७
नुम्विसर्जनीयशर्व्यवायेऽपि	८ । ३ । ५८
आदेशप्रत्यययोः	८ । ३ । ५९
शासिवसिघसीनां च	८ । ३ । ६०
स्तौतिण्योरेव षण्यभ्यासात्	८ । ३ । ६१
सः स्विदिस्वदिसहीनां च	८ । ३ । ६२
प्राक्सितादड्व्यवायेऽपि	८ । ३ । ६३
स्थादिष्वभ्यासेन चाभ्यासस्य	८ । ३ । ६४
उपसर्गात्सुनोतिसुवतिस्य-तिस्तौतिस्तोभतिस्थासे-नयसेधसिचसञ्जस्वञ्जाम्	८ । ३ । ६५
सदिरप्रतेः	८ । ३ । ६६
स्तन्भेः	८ । ३ । ६७
अवाच्चाऽऽलम्बनाऽऽविदूर्ययोः	८ । ३ । ६८
वेश्च स्वनोभो जने	८ । ३ । ६९
परिनिविभ्यः सेवासितसयसिवुसहसुटूस्तुस्वञ्जाम्	८ । ३ । ७०
शिवादीनां वाऽड्व्यवायेऽपि	८ । ३ । ७१
अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु	८ । ३ । ७२
वेः स्कन्देरनिष्ठायाम्	८ । ३ । ७३
परेश्च	८ । ३ । ७४
परिस्कन्दः प्राच्यभरतेषु	८ । ३ । ७५
स्फुरतिस्फुलत्योर्निर्निविभ्यः	८ । ३ । ७६
वेः स्कभ्नातेर्नित्यम्	८ । ३ । ७७
इणः षीध्वंलुङ्लिटां धोऽङ्गात्	८ । ३ । ७८

सूत्राणि ।	अ० पा० सू०
विभाषेटः	८ । ३ । ७९
समासेऽङ्गुलेः सङ्गः	८ । ३ । ८०
भीरोः स्थानम्	८ । ३ । ८१
अग्नेः स्तुत्स्तोमसोमाः	८ । ३ । ८२
ज्योतिरायुषः स्तोमः	८ । ३ । ८३
मातृपितृभ्यां स्वसा	८ । ३ । ८४
मातुःपितुर्भ्यामन्यतरस्याम्	८ । ३ । ८५
अभिनिसः स्तनः शब्दसंज्ञायाम्	८ । ३ । ८६
उपसर्गप्रादुर्भ्यामस्तिर्यच्परः	८ । ३ । ८७
सुविनिर्दुर्भ्यः सुपिसूतिसमाः	८ । ३ । ८८
निनदीभ्यां स्नातेः कौशले	८ । ३ । ८९
सूत्रं प्रतिष्णातम्	८ । ३ । ९०
कपिष्ठलो गोत्रे	८ । ३ । ९१
प्रष्ठोऽग्रगामिनि	८ । ३ । ९२
वृक्षासनयोर्विष्टरः	८ । ३ । ९३
छन्दोनाम्नि च	८ । ३ । ९४
गवियुधिभ्यां स्थिरः	८ । ३ । ९५
विकुशमिपरिभ्यः स्थलम्	८ । ३ । ९६
अम्बाम्बगोभूमिसव्यापद्दिवित्रिकुशेकुशङ्ककुभ्रञ्झिपुञ्झिपरमेवर्हिर्दिव्यग्निभ्यः स्थः	८ । ३ । ९७
सुषामादिषु च	८ । ३ । ९८
एति संज्ञायामगात्	८ । ३ । ९९
नक्षत्राद्वा	८ । ३ । १००
ह्रस्वात्तादौ तद्धिते	८ । ३ । १०१
निसस्तपतावनासेवने	८ । ३ । १०२
युष्मत्तत्ततक्षुष्वन्तःपादम्	८ । ३ । १०३
यजुष्येकेषाम्	८ । ३ । १०४

सूत्राणि ।	अ०	पा०	सू०
स्तुतस्तोमयोश्छन्दसि	८	३	१०५
पूर्वपदात्	८	३	१०६
सुञः	८	३	१०७
सनोतेरनः	८	३	१०८
सहेः पृतनर्ताभ्यां च	८	३	१०९
न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्	८	३	११०
सात्पदाद्योः	८	३	१११
सिचो यङि	८	३	११२
सेधतेर्गतौ	८	३	११३
मतिस्तब्धनिस्तब्धौ च	८	३	११४
सोढः	८	३	११५
स्तम्भुसिवुसहां चङि	८	३	११६
सुनोतेः स्यसनोः	८	३	११७
सदेः परस्य लिटि	८	३	११८
निव्यभिभ्योऽड्व्यवाये वा छन्दसि	८	३	११९
मतुवसोरूञिचेदुदुपधस्तौतिण्योर्भीरोर्ह्रस्वादेकोनविंशतिः ॥ इत्यष्टमाध्यायस्य तृतीयः पादः ॥ ३ ॥			
रषाभ्यां नो णः समानपदे	८	४	१
अट्कुप्वाङ्नुम्व्यवायेऽपि	८	४	२
पूर्वपदात्संज्ञायामगः	८	४	३
वनं पुरगामिश्रकासिध्रका-सारिकाकोटराग्रेभ्यः	८	४	४
प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्य-खादिरपीयूक्षाभ्योऽसंज्ञायामपि	८	४	५
विभाषौषधिवनस्पतिभ्यः	८	४	६
अह्नोऽदन्तात्	८	४	७
वाहनमाहिताद्	८	४	८
पानं देशे	८	४	९
वा भावकरणयोः	८	४	१०
मातिपादिकान्तनुम्विभक्तिषु च	८	४	११
एकाजुत्तरपदे णः	८	४	१२
कुमति च	८	४	१३
उपसर्गादसमासेऽपि णोपदेशस्य	८	४	१४
हिनुमीना	८	४	१५
आनि लोट्	८	४	१६
नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च	८	४	१७
शेषे विभाषाऽकखादावषान्त उपदेशे	८	४	१८
आनितेः	८	४	१९
अन्तः	८	४	२०
उभौ साभ्यासस्य	८	४	२१
हन्तेरत्पूर्वस्य	८	४	२२
वमोर्वा	८	४	२३
अन्तरदेशे	८	४	२४
अयनं च	८	४	२५
छन्दस्यृदवग्रहात्	८	४	२६
नश्च धातुस्थोरुषुभ्यः	८	४	२७
उपसर्गाद्धलम्	८	४	२८
कृत्यचः	८	४	२९
णेर्विभाषा	८	४	३०
हलश्चेजुपधात्	८	४	३१

सूत्राणि ।	अ०	पा०	सू०
इजादेः सनुमः	८	४	३२
वा निंसनिक्षनिन्दाम्	८	४	३३
न भाभूपूकमिगमिप्यायी-वेपाम्	८	४	३४
षात्पदान्तात्	८	४	३५
नशेः षान्तस्य	८	४	३६
पदान्तस्य	८	४	३७
पदव्यवायेऽपि	८	४	३८
क्षुभ्नादिषु च	८	४	३९
स्तोः श्चुना श्चुः	८	४	४०
ष्टुना ष्टुः	८	४	४१
न पदान्ताट्टोरनाम्	८	४	४२
तोः षि	८	४	४३
शात्	८	४	४४
यरोऽनुनासिकेऽनुनासिकोवा	८	४	४५
अचो रहाभ्यां द्वे	८	४	४६
अनचि च	८	४	४७
नादिन्याक्रोशे पुत्रस्य	८	४	४८
शरोऽचि	८	४	४९
त्रिप्रभृतिषु शाकटायनस्य	८	४	५०
सर्वत्र शाकल्यस्य	८	४	५१

सूत्राणि ।	अ०	पा०	सू०
दीर्घादाचार्याणाम्	८	४	५२
झलां जशू झशि	८	४	५३
अभ्यासे चर्च	८	४	५४
खरि च	८	४	५५
वाऽवसाने	८	४	५६
अणोऽप्रगृह्यस्यानुनासिकः	८	४	५७
अनुस्वारस्य ययि परसवर्णः	८	४	५८
वा पदान्तस्य	८	४	५९
तोर्लि	८	४	६०
उदः स्थास्तम्भोः पूर्वस्य	८	४	६१
झयो होऽन्यतरस्याम्	८	४	६२
शश्छोऽटि	८	४	६३
हलो यमां यमि लोपः	८	४	६४
झरो झरि सवर्णे	८	४	६५
उदात्तादनुदात्तस्य स्वरितः	८	४	६६
नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्	८	४	६७
अ अ	८	४	६८

रषाभ्यामुभौष्टुनोदःस्थाष्टौ ॥

॥ इत्यष्टमाध्यायस्य चतुर्थः पादः ॥ ४॥

॥ इत्यष्टमोऽध्यायः समाप्तः ॥ ८॥

॥ इत्यष्टाध्यायीसूत्रपाठः ॥

पुस्तक मिलनेका ठिकाना-

खेमराज श्रीकृष्णदास,

" श्रीवेंकटेश्वर " छापाखाना-मुंबई.

अथ गणपाठः ।

प्रथमोऽध्यायः ।

१७ **सर्वादीनि सर्वनामानि । १ ।१।२७॥** सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अंतरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ॥ **इति सर्वादिः ॥१॥**

४४ **स्वरादिनिपातमव्ययम् । १ । १ । ३७॥** स्वर् अन्तर् मातर् । **अन्तोदात्ताः ।** पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् [अन्तिकात्] पृथक् । **आद्युदात्ताः ।** ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् मनाक् ईषत् [शश्वत्] जोषम् तूष्णीम् बहिस् [अधस्] अवस् समया निकषा स्वयम् मृषा नक्तम् नञ् हेतौ [हे है] इद्धा अद्धा सामि । **अन्तोदात्ताः ।** वत्[५।१।११५]ब्राह्मणवत् क्षत्रियवत् सना सनत् सनात् उपधा तिरस् । **आद्युदात्ताः ।** अन्तरा । **अन्तोदात्तः ।** अन्तरेण [मक्] ज्योक् [योक् नक्] कम् शम् सहसा [श्रद्धा] अलम् स्वधा वषट् विना नाना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या । क्त्वातोसुन्कसुनः । कृन्मकारसंध्यक्षरान्तोऽव्ययीभावश्च । पुरा मिथो मिथस् प्रायस् प्रवाहुकम् प्रवाहिका आर्यहलम् अभीक्ष्णम् साकम् सार्धम् [सत्रम् समम्] नमस् हिरुक् । तासिलादयस्तद्धिता एधाञ्चपर्यन्ताः [५ । ३ । ७–४६] शस्तसी कृत्वसुच् सुच् आस्थाल्यौ । च्व्यर्थाश्च । [अथ] अम् आम् मताम् मतान् मशान् । **आकृतिगणोऽयम् ।** तेनान्येऽपि । तथा हि । माङ् श्रम् कामम् [मकामम्] भूयस् परम् साक्षात् साचि (सावि) सत्यम् मङ्क्षु संवत् अवश्यम् सपदि मादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजस्रम् संततम् उषा ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अ मिथु (अमिथु) विथक् भाजक् अन्वक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अस्तम् आनुषक् अनुषक् अनुषट् अम्नस् (अम्भस्) अम्नर् (अम्भर्) स्थाने वरम् दुष्ठु बलात् शु अर्वाक् शुदि वदि इत्यादि । तासिलादयः माक्पाशपः [६ । ३ । ३६] शस्प्रभृतयः माक्समासान्तेभ्यः [५ । ४ । ४३–६८] । मान्तः कृत्वोर्थः । तासिवती नानाञाविति ॥ **इति स्वरादिः ॥ २ ॥**

३ **चादयोऽसत्त्वे । १ । ४ । ५७ ॥** च वा ह अह एव एवम् नूनम् शश्वत् यूपत् युगपत् भूयस् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तत्र नह हन्त माकिम् माकीम् माकिर् नाकिम् नकीम् नकिर् आकीम् माङ् नञ् तावत् यावत् त्वा न्वै त्वै द्वै रै [रे] श्रौषट् वौषट् स्वाहा स्वधा ओम् तथा तथाहि खलु किल अथ सुष्ठु स्म अ इ

उ ऋ ऌ ए ऐ ओ औ आदह उञ्च उकञ्च वेलायाम् मात्रायाम् यथा यत् तत् किम् पुरा वधा (वध्वा) धिक् हाहा हेहै (हहे) पाट् प्याट् आहो उताहो हो अहो नो (नौ) अथो ननु मन्ये मिथ्या असि ब्रूहि तु नु इति इव वत् वात् वन बत [सम् वशम् शिकम् दिकम्] सनुकम् छंबट् (छम्बट्) शङ्के शुकम् खम् सनात् सनतर् तहिकम् सत्यम् ऋतम् अद्धा इद्धा नोचेत् नहि जातु कथम् कुतः कुत्र अव अनु हाहे (है) आहोस्वित् शम् कम् खम् दिष्ट्या पशु वट् सह अनुषट् आनुषक् अङ्ग फट् ताजक् भाजक् अये अरे वाट् (चाटु) कुम् खुम् घुम् अम् ईम् सीम् सिम् सि वै । उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः । **आकृतिगणोऽयम्॥ इति चादयः ॥३॥**

३ प्रादयः । १ । ४ । ५४ ॥ प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप ॥ **इति प्रादयः ॥ ४ ॥**

७६ ऊर्यादिच्विडाचश्च । १ । ४ । ६१ ॥ ऊरी उररी तन्थी ताली आताली वेताली धूली धूसी शकला संशकला ध्वंसकला भ्रंसकला गुलगुधा सजूस् फल फली विक्री आक्री आलोष्ठी केवाली केवासी सेवासी पर्याली शेवाली वर्षाली अत्यूमशा वश्मसा मस्मसा मसमसा औषट् श्रौषट् वौषट् वषट् स्वाहा स्वधा पांपी प्रादुस् श्रत् आविस् ॥ **इत्यूर्यादयः ॥ ५ ॥**

७७ साक्षात्प्रभृतीनि च । १ । ४ । ७४ ॥ साक्षाद् मिथ्या चिन्ता भद्रा रोचना आस्था अमा अद्धा प्राजर्या प्राजरुहा बीजर्या बीजरुहा संसर्या अर्थे लवणम् उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने विहसने प्रतपने प्रादुस् नमस् । **आकृतिगणोऽयम् ॥ इति साक्षात्प्रभृतयः ॥ ६ ॥**

द्वितीयोऽध्यायः ।

६७ तिष्ठद्गुप्रभृतीनि च । २ । १ । १७ ॥ तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम् दुःषमम् निःषमम् अपसमम् आयतीसमम् (मोढम्) पापसमम् पुण्यसमम् प्राङ्गम् प्रत्यम् प्रमृगम् प्रदक्षिणम् (अपरदक्षिणम्) संप्रति असंप्रति । इच्प्रत्ययः समासान्तः । [५।४।१२७॥ ५ । ४ । १२८] ॥ **इति तिष्ठद्गुप्रभृतयः ॥ १ ॥**

७१ सप्तमी शौण्डैः । २ । १ । ४० ॥ शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण ॥ **इति शौण्डादयः ॥ २ ॥**

७२ पात्रेसमितादयश्च । २ । १ । ४८ ॥ पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकः उदुम्बरकृमिः कूपकच्छपः अवटकच्छपः कूपमण्डूकः कुम्भमण्डूकः उदपानम-

ण्ढूकः नगरकाकः नगरवायसः मातरिपुरुषः पिण्डीशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहेक्ष्वेडी गेहेविजिती गेहेव्याडः गेहेमही गेहेदाही गेहेदृप्तः गेहेधृष्टः गर्भैतृप्तः आखनिकबकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेक्ष्वेडी गोष्ठेपटुः गोष्ठेपण्डितः गोष्ठेप्रगल्भः कर्णेटिरिटिरा कर्णेचुरुचुरा । **आकृतिगणोऽयम् ॥ इति पात्रेसमितादयः ॥ ३ ॥**

७३ **उपमितं व्याघ्रादिभिः सामान्याप्रयोगे । २ । १ । ५६ ॥** व्याघ्र सिंह ऋक्ष ऋषभ चन्दन वृक वृष वराह हस्तिन् तरु कुञ्जर रुरु पृषत् पुण्डरीक पलाश कितव ॥ **इति व्याघ्रादयः ॥ आकृतिगणोऽयम् ।** तेन मुखपद्मम् मुखकमलम् करकिसलयम् पार्थिवचन्द्रः इत्यादि ॥ ४ ॥

७३ **श्रेण्यादयः कृतादिभिः २ । १ । ५९ ॥**

१ श्रेणि एक पूग मुकुन्द राशि निचय विषय निधन पर इन्द्र देवमुण्ड भूत श्रमण वदान्य अध्यापक अभिरूपक ब्राह्मण क्षत्रिय [विशिष्ट] पटु पण्डित कुशल चपल निपुण कृपण ॥ **इत्येते श्रेण्यादयः ॥ ५ ॥**

२ कृत मित मत भूत उक्त [युक्त] समाज्ञात समाम्नात समाख्यात संभावित [संसेवित] अवधारित अवकल्पित निराकृत उपकृत उपाकृत [दृष्ट कलित दलित उदाहृत विश्रुत उदित] । **आकृतिगणोऽयम् ॥ इति कृतादिः ॥ ६ ॥**

७४ * **शाकपार्थिवादीनामुपसंख्यानम् *** **२ । १ । ६० ॥** शाकपार्थिव कुतपसौश्रुत अजातौल्वलि । **आकृतिगणोऽयम् ।** कृतापकृत भुक्तविभुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका ॥ **इति शाकपार्थिवादिः ॥ ७ ॥**

७५ **कुमारः श्रमणादिभिः । २ । १ । ७० ॥** श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी अध्यापक अभिरूपक पण्डित पटु मृदु कुशल चपल निपुण ॥ **इति श्रमणादयः ॥ ८ ॥**

७५ **मयूरव्यंसकादयश्च । २ । १ । ७२ ॥** मयूरव्यंसक छात्रव्यंसक कम्बोजमुण्ड यवनमुण्ड । छन्दसि । हस्तेगृह्य (हस्तगृह्य) पादेगृह्य (पादगृह्य) लाङ्गूलेगृह्य (लाङ्गूलगृह्य) पुनर्दाय । एहीडादयोऽन्यपदार्थे । एहीडम् एहियवम् एहिवाणिजा क्रिया। अपेहिवाणिजा मेहिवाणिजा एहिस्वागता अपेहिस्वागता एहिद्वितीया अपेहिद्वितीया । मेहिद्वितीया एहिकटा अपेहिकटा मेहिकटा आहरकरटा मेहिकर्दमा मोहकर्दमा विधमचूडा उद्धमचूडा (उद्धरचूडा) आहरचेला आहरवसना (आहरसेना) आहरवनिता (आहरवितना) कृन्तविचक्षणा उद्धरोत्सृजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चावचम् उच्चनीचम् आचोपचम् आचपराचम् [नखप्रचम्] निश्चप्रचम् अकिंचन स्नात्वाकालक पीत्वास्थिरक भुक्त्वासुहित मोष्यपापीयान् उत्पत्यपाकला निपत्यरोहिणी निषण्णश्यामा अपेहिप्रघसा एहिविघसा इहपञ्चमी इहद्वितीया । जहि-

कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति । जहिजोडः (जहिजोडम्) जहिस्तम्बम् (जहिस्तम्बः) [उज्जहिस्तम्बम्] । आख्यातमाख्यातेन क्रियासातत्ये । अश्नीतपिबता पचतभृज्जता खादतमोदता खादतवमता (खादताचमता) आहरनिवपा आहरनिष्किरा (आवपनिष्किरा) उत्पचविपचा भिन्धिलवणा कृन्धिविचक्षणा पचलवणा पचमकूटा । **आकृतिगणोऽयम्** । तेन । अकुतोभयः कान्दिशीकः (कान्देशीकः) आहोपुरुषिका अहमहमिका यदृच्छा एहिरेयाहिरा उन्मृजावमृजा द्रव्यान्तरम् अवश्यकार्यम् ॥ **इत्यादिमयूरव्यंसकादयः** ॥ ९ ॥

७० **याजकादिभिश्च** । २ । २ । ९ ॥ याजक पूजक परिचारक परिवेषक [परिषेचक] स्नापक अध्यापक उत्साहक उद्वर्तक होतृ भर्तृ रथगणक पत्तिगणक ॥ **इति याजकादयः** ॥ १० ॥

८९ **राजदन्तादिषु परम्** । २ । २ । ३१ ॥ राजदन्तः अग्रेवणम् लिप्तवासितम् नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोतम् (अर्पितोप्तम्) उप्तगाढम् उलूखलमुसलम् तण्डूलकिण्वम् दृषदुपलम् आरड्वायनि (आरग्वायनबन्धकी) चित्ररथवाह्लीकम् अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विश्वक्सेनार्जुनौ अक्षिभ्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गाजवाजम् (गोजवाजम्) गोपालिधानपूलासम् (गोपालधानीपूलासम्) पूलासकारण्डम् (पूलासककुरण्डम्) स्थूलासम् (स्थूलपूलासम्) उशीरबीजम् [जिज्ञास्थि] सिञ्जास्थम् (सिञ्जाश्वत्थम्) चित्रास्वाती (चित्रस्वाती) भार्यापती दम्पती जम्पती जायापती पुत्रपती पुत्रपशू केशश्मश्रू शिरोब्रिजु (शिरोबीजम्) शिरोजानु सर्पिर्मधुनी मधुसर्पिषी (आद्यन्तौ) अन्तादी गुणवृद्धी वृद्धिगुणौ ॥ **इति राजदन्तादिः** ॥ ११ ॥

८९ **वाहिताग्न्यादिषु** । २ । २ । ३७ ॥ आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत [मद्यपीत] ऊढभार्य गतार्थ । **आकृतिगणोऽयम्** । तेन । गडुकण्ठ अस्युद्यत (अरमुद्यत) दण्डपाणिप्रभृतयोऽपि॥ **इत्याहिताग्न्यादयः**॥१२॥

७५ **कडाराः कर्मधारये** । २ । २ । ३८ ॥ कडार गडुल खञ्ज खोड कण कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गुल(पिङ्गल) तड तनु [जठर] बधिर मठर कञ्ज बर्बर ॥ **इति कडारादयः** ॥ १३ ॥

६० * **नौकाकान्नशुकशृगालवर्जेषु** * २ । ३ । १७ ॥ नौ काक अन्न शुक शृगाल ॥ **इति नावादयः** ॥ १४ ॥

५८* **प्रकृत्यादिभ्य उपसंख्यानम्** * २ । ३ । १८ ॥ प्रकृति माय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र ॥ **इति प्रकृत्यादयः** ॥ १५ ॥

९१ **गवाश्वप्रभृतीनि च** । २ । ४ । ११ ॥ गवाश्वम् गवाविकम् गवैडकम् अजाविकम् (अजैडकम्) कुञ्जवामनम् कुञ्जकिरातम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकु-

मारम् दासीमाणवकम् शाटीपटीरम् शाटीमच्छदम् शाटीपट्टिकम् उष्ट्रखरम् उष्ट्रशशम् मूत्रशकृत् मूत्रपुरीषम् यकृन्मेदः मांसशोणितम् दर्भशरम् दर्भपूतीकम् अर्जुनशिरीषम् अर्जुनपुरुषम् तृणोपलम् (तृणोलपम्) दासीदासम् कुटीकुटम् भागवतीभागवतम् ॥ **इति गवाश्वप्रभृतीनि ॥ १६ ॥**

९१ **न दधिपयआदीनि** । २ । ४ । १४ ॥ दधिपयसी सर्पिर्मधुनी मधुसर्पिषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राजककौशिकौ (परिव्राट्कौशिकौ) मवर्ग्योपसदौ शुक्लकृष्णौ इध्मावर्हिषी दीक्षातपसी (श्रद्धातपसी मेधातपसी) अध्ययनतपसी उलूखलमुसले आद्यवसाने श्रद्धामेधे ऋक्साम्ने वाङ्मनसे ॥ **इति दधिपयआदीनि ॥ १७ ॥**

८१ **अर्धर्चाः पुंसि च** । २ । ४ । ३१ ॥ अर्धर्चं गोमय कषाय कार्षापण कुतप कुसप (कुणप) कपाट शङ्ख गूथ यूथ ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप द्यूत चक्र धर्म कर्मन् मोदक शतमान यान नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु पिधान सार पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीव षष्टिक वारवाण (वारवारण) मोथ कपित्थ [शुष्क] शाल शील शुक्र (शुल्क) शीधु कवच रेणु [ऋण] कपट शीकर मुसल सुवर्ण वर्ण पूर्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त वुस्त क्ष्वेडित शृङ्ग निगड [खल] मूलक मधु मूल स्थूल शराव नाल वप्र विमान मुख ग्रीव शूल वज्र कटक कण्टक [कर्पट] शिखर कल्क [वल्क] नटमक [नाटमस्तक] वलय कुसुम तृण पङ्क कुण्डल किरीट [कुमुद] अर्बुद अङ्कुश तिमिर आश्रय भूषण इक्कस [इष्वास] मुकुल वसन्त तटाक [तडाग] पिटक विटङ्क विडङ्ग पिण्याक माष कोश फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास [विशाल] चषाल [चखाल] खण्ड दर विटप [रण वल मक] मृणाल हस्त आर्द्र हल [सूत्र] ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल [छल] पुर [पुरा] राष्ट्र अम्बर विम्ब कुट्टिम मण्डल [कुक्कुट] कुडप ककुद खण्डल तोमर तोरण मञ्चक पञ्चक पुङ्ख मध्य [वाल] छाल वल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन [स्तन स्वर] संगम निष्कक्षेम शूक क्षत्र पवित्र यौवन कलह मालक [पालक] मूषिक [मण्डल वल्कल] कुज [कुञ्ज] विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमन [लोमश] तमाल लोह दण्डक शपथ मतिसर दारु धनुस् मान वर्चस्क कूर्च तण्डक मठ सहस्र ओदन मवाल शकट अपराह्ण नीड शकल तण्डुल ॥ **इत्यर्धर्चादिः ॥ १८ ॥**

१०६ **पैलादिभ्यश्च** । २ । ४ । ५९ ॥ पैल शालङ्कि सात्यकि सात्यकामि राहवि रावणि औदञ्चि औदव्रजि औदमेधि औदव्यञ्जि (औदमञ्जि) औदभृञ्जि दैवस्थानि

पैङ्गलौदायनि राहक्षाति भौलिङ्गि राणि औदन्यि औद्गाहमानि औज्जिहानि औदशुद्धि तद्राजाच्चाणः (तद्राज) ॥ **आकृतिगणोऽयम् । इति पैलादिः ॥ १९ ॥**

१०६ न तौल्वलिभ्यः । २ । ४ । ६१ ॥ तौल्वलि धारणि पारणि रावणि दैलीपि दैवति वार्कलि नैवति (नैवकि) दैवमित्रि (दैवमति) दैवयज्ञि चाफट्टकि वैल्वकि वैकि (वैङ्कि) आनुहारति (आनुरोहति) पौष्करसादि आनुरोहति आनुति मादोहनि नैमिश्रि माडाहति बान्धकि वैशीति आसिनासि आहिंसि आसुरि नैमिषि आत्रिबन्धकि पौष्पि कारेणुपालि वैकर्णि वैरकि वैहति ॥ **इति तौल्वल्यादिः ॥ २० ॥**

११२ यस्कादिभ्यो गोत्रे । २ । ४ । ६३ ॥ यस्क लह्य ह्रुह्य अयस्थूण [अयःस्थूण] तृणकर्ण सदामत्त कम्बलहार बहिर्योग कर्णाढक पर्णाढक पिण्डीजङ्घ वकसक्थ [बकसक्थ] विश्रि कुद्रि अजवस्ति मित्रयु रक्षोमुख जङ्घारथ उत्कास कटुक मथक [मन्थक] पुष्करट [पुष्करसद्] विषपुट उपरिमेखल क्रोष्टुकमान [क्रोष्टुमान] क्रोष्टुपाद क्रोष्टुमाय शीर्षमाय खरप पदक वर्षुक भलन्दन भडिल भण्डिल भडित भण्डित **एते यस्कादयः ॥ २१ ॥**

११२ न गोपवनादिभ्यः । २ । ४ । ६७ ॥ गोपवन शेयु [शिग्रु] विन्दु भाजन अश्वावतान श्यामक [श्योमाक] श्यामाक श्यापर्ण ॥ **बिदाद्यन्तर्गणोऽयम् (४ । १ । १०४) इति गोपवनादिः ॥ २२ ॥**

११२ तिककितवादिभ्यो द्वन्द्वे । २ । ४ । ६८ ॥ तिककितवाः वङ्खरभण्डीरथाः उपकलमकाः पफकनरकाः बकनखगुदपरिणद्धाः उञ्जककुभाः लङ्कशान्तमुखाः उत्तरशलङ्कटाः कृष्णाजिनकृष्णसुन्दराः भ्रष्टककपिष्ठलाः अग्निवेशदशेरुकाः ॥ **एते तिककितवादयः ॥ २३ ॥**

११२ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे । २ । ४ । ६९ ॥ उपक लपक भ्रष्टक कपिष्ठल कृष्णाजिन कृष्णसुन्दर चूडारक आडारक गडुक उदङ्क सुधायुक अवन्धक पिङ्गलक पिष्ट सुपिष्ट [सुपिष्ठ] मयूरकर्ण खरीजङ्घ शलाथक पतञ्जल पदञ्जल कठेरणि कुषीतक कशकृत्स्न [काशकृत्स्न] निदाघ कलशीकण्ठ दामकण्ठ कृष्णपिङ्गल कर्णक पर्णक जटिरक बधिरक जन्तुक अनुलोम अनुपद मतिलोम अपजग्ध मतान अनभिहित कमक वराटक लेखाभ्र कमन्दक पिञ्जूलक वर्णक ममूरकर्ण मदाघ कवन्तक कमन्तक कदामत दामकण्ठ ॥ **एते उपकादयः ॥ २४ ॥**

तृतीयोऽध्यायः ।

८१ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः । ३ । १ । १२ ॥ भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहत् रेहत् संश्वत् तृपत् शश्वत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अण्डर वर्चस् ओजस् सुरजस् अरजस् ॥ **एते भृशादयः ॥ १ ॥**

८२ **लोहितादिडाज्भ्यः क्यष्** । ३ । १ । १३ ॥ लोहित चरित नील फेन मद्र हरित दास मन्द ॥ **लोहितादिराकृतिगणः** ॥ २ ॥

८२ **सुखादिभ्यः कर्तृवेदनायाम्** । ३ । १ । १८ ॥ सुख दुःख तृप्त कृच्छ्र अस्त्र आस्त्र अलीक मतीग करुण कृपण सोढ ॥ **इत्येतानि सुखादीनि** ॥ ३ ॥

८४ **कण्ड्वादिभ्यो यक्** । ३ । १ । २७ ॥ कण्डूञ् मन्तु हृणीङ् वल्गु असु [मनस्] महीङ् लाट् लेट् इरस् इरज् इरञ् दुवस् उषस् वेट् मेधा कुषुभ [नमस्]मगध तन्तस् पम्पस् [पपस्] सुख दुःख (भिक्ष चरण चरम अवर) सपर अरर [अरर्] भिषज् भिष्णुज् [अपर आर] इषुध वरण चुरण तुरण भुरण गद्गद एला केला खेला [वेला शेला] लिट् लोट् [लेखा लेख] रेखा द्रवस् तिरस् अगद उरस् तरण [तारिण] पयस् संभूयस् सम्वर ॥ **आकृतिगणोऽयम्** ॥ **इति कण्ड्वादिः** ॥ ४ ॥

१०७ **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** । ३ । १ । १३४ ॥

१ नन्दिवाशिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् । नन्दनः वाशनः मदनः दूषणः साधनः वर्धनः शोभनः रोचनः । सहितापिदमः संज्ञायाम् । सहनः तपनः दमनः । जल्पनः रमणः दर्पणः संक्रन्दनः संकर्षणः संहर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविनाशनः कुलदमनः [शत्रुदमनः] **इति नन्द्यादिः**॥५॥

२ ग्राही उत्साही उद्दासी उच्चासी स्थायी मन्त्री संमर्दी । रक्षश्रुवपशां नौ । निरक्षी मिश्रावी निवापी निशायी । याचूञ्याहव्रजवद्वसां मतिषिद्धानाम् । अयाची अव्याहारी असंव्याहारी अव्राजी अवादी अवासी । अचामचित्तकर्तृकाणाम् । अकारी अहारी अविनायी [विशायी विषायी] विशयी विषयी देशे । विशयी विषयी देशः । अभिभावी भूते । अपराधी उपरोधी परिभवी परिभावी ॥ **इति ग्रहादिः** ॥ ६ ॥

३ पच वच वप वद चल पत नदट् भषट् ह्लुवट् चरट् गरट् तरट् चोरट् गाहट् सूरट् देवट् [दोषट्] जर (रज) मर (मद) क्षम (क्षप) सेव मेष कोप (कोष) मेध नर्त व्रण दर्श सर्प [दम्भ दर्प] जार भर श्वपच ॥ **पचादिराकृतिगणः**॥ ७ ॥

११० * **कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्** * ३ । २ । ५ ॥ मूलविभुज नखमुच काकगुह कुमुद महीध्र कुध्र गिध्र ॥ **आकृतिगणोऽयम्** ॥ **इति मूलविभुजादयः** ॥ ८ ॥

११० * **पार्श्वादिषूपसंख्यानम्** * ३ । २ । १५ ॥ पार्श्व उदर पृष्ठ उत्तान अवमूर्धन् ॥ **इति पार्श्वादिः** ॥ ९ ॥

१५० **भविष्यति गम्यादयः** ३ । ३ । ३ ॥ गमी आगमी भावी मस्थायी मतिरोधी प्रतियोधी प्रतिबोधी प्रतियायी प्रतियोगी ॥ **एते गम्यादयः** ॥ १० ॥

१५६ * **संपदादिभ्यः क्विप्** * ३ । ३ । ९४ ॥ संपद् विपद् आपद् प्रतिपद् परिषद् ॥ **एते संपदादयः** ॥ ११ ॥

१५७ **षिद्भिदादिभ्योऽङ्** ३ । ३ । १०४ ॥ भिदा विदारणे । छिदा द्वैधीकरणे । विदा । क्षिपा । गुहा गिर्योषध्योः । श्रद्धा मेधा गोधा । आरा शस्त्र्याम् । हारा । कारा बन्धने । क्षिया । तारा ज्योतिषि । धारा प्रपातने । रेखा चूडा पीडा वपा वसा मृजा । कृपेः संप्रसारणं च । कृपा ॥ **इति भिदादिः** ॥ १२ ॥

१५० **भीमादयोऽपादाने** । ३ । ४ ॥ ७४ ॥ भीम भीष्म भयानक वहचर (वह-चरु) प्रस्कन्दन प्रपतन (प्रतपन) समुद्र स्रुव स्रुक् वृष्टि (दृष्टि) रक्षः संकसुक (शङ्कसुक) मूर्ख खलति ॥ **आकृतिगणोऽयम्** ॥ **इति भीमादिः** ॥ १३ ॥

चतुर्थोऽध्यायः ।

४५ **अजाद्यतष्टाप्** । ४ । १ । ४ ॥ अजा एडका कोकिला चटका अश्वा मूषिका बाला होडा पाका वत्सा मन्दा विलाता पूर्वापिहाणा (पूर्वापहणा) अपरापहाणा । संप्रसारणाजिनशणपिण्डेभ्यः फलात् । सदचूकाण्डप्रान्तशतैकेभ्यः पुष्पात् । शूद्रा चामहत्पूर्वा जातिः । क्रुञ्चा उष्णिहा देवविशा । ज्येष्ठा कनिष्ठा मध्यमा पुंयोगेऽपि । मूलान्नञः । दंष्ट्रा ॥ **एतेऽजादयः** ॥ १ ॥

२८ **न षट्स्वस्रादिभ्यः** । ४ । १ । १० ॥ स्वसृ दुहितृ ननान्दृ यातृ मातृ तिसृ चतसृ ॥ **इति स्वस्रादिः** ॥ २ ॥

५० **नित्यं सपत्न्यादिषु** । ४ । १ । ३५ ॥ समान एक वीर पिण्ड श्व (शिरी) भ्रातृ भद्र पुत्र । दासाच्छन्दसि ॥ **इति समानादिः** ॥ ३ ॥

५० **षिद्गौरादिभ्यश्च** ४ । १ । ४१ ॥ गौर मत्स्य मनुष्य शृङ्ग पिङ्गल हय गवय मुकय ऋष्य [पुट तूण] द्रुण द्रोण हरिण कोकण (काकण) पटर उणक [आमल] आमलक कुवल बिम्ब वदर फर्करक (कर्कर) तर्कार शर्कार पुष्कर शिखण्ड सलद शष्कण्ड सनन्द सुषम सुषव अलिन्द गडुल पाण्डश आढक आनन्द आश्वत्थ सूपाट आखक (आपच्चिक) शष्कुल सूर्य (सूर्म) शूर्प सूच यूप (पूष) यूथ सूप मेथ वल्लक व्रातक सल्लक मालक मालत साल्वक वेतस वृक्ष (वृस) अतस [उभय] भृङ्ग मह मेह छेद पेश भेद श्वन् तक्षन् अनड्वही अनड्वाही । एषणः करणे । देह देहल काकादन गवादन तेजन रजन लवण औद्वाहमानि (आद्वाहमानि) गौतम (गोतम) [पारक] अयस्थूण (अयःस्थूण) भौरिकि भौलिकि भौलिङ्गि यान मेध आलम्बि आलजि आलञ्चि आलक्षि केवाल आपक आरट नट टोट नोट मुलाट ज्ञातन [पोतन] पातन पाठन (पानठ) आस्तरण अधिकरण अधिकार अग्रहायणी (आग्रहायणी) मत्यवरोहिणी [सेचन] । सुमङ्गलात्संज्ञायाम् । अण्डर सुन्दर मण्डल मन्थर मङ्गल पट पिण्ड [५ण्ड] उर्द गुर्द शम मृद औड (आर्द्र) ह्रद (ह्रद) पाण्ड [भाण्डल] भाण्ड [लोहाण्ड] कदर कन्दर कदल तरुण तलुन कल्माष बृहत्

महव् [सोम] सौधर्म । रोहिणी नक्षत्रे । रेवती नक्षत्रे । (विकल) निष्कल पुष्कल । कटाच्छ्रोणिवचने । पिप्पल्यादयश्च । पिप्पली हरितकी (हरीतकी) कोशातकी शमी वरी शरी पृथिवी कोष्टु मातामह पितामह । **इति गौरादिः ॥ ४ ॥**

५१ **बह्वादिभ्यश्च** । ४ । १ । ४५ ॥ बहु पद्धति अश्वति अङ्कति अंहति शकटि (शकति) । शक्तिः शस्त्रे । शारि वारि राति राधि [शाधि] आहि कपि यष्टि मुनि । इतः माण्यङ्गात् । कृदिकारादक्तिनः । सर्वतोऽक्तिन्नर्थादित्येके । चण्ड अराल कृपण कमल विकट विशाल विशङ्कट भरुज ध्वज । चन्द्रभागान्नद्याम् (चन्द्रभागा नद्याम्) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा वाल शफ गुद ॥ **आकृतिगणोऽयम् ॥** तेन । भग गल राग इत्यादि ॥ **इति बह्वादयः ॥ ५ ॥**

५४ **शार्ङ्गरवाद्यञो ङीन्** । ४ । १ । ७३ ॥ शार्ङ्गरव कापटव गौग्गुलव ब्राह्मण बैद गौतम कामण्डलेय ब्राह्मणकृतेय [आनिचेय] आनिधेय आशोकेय वात्स्यायन मौञ्जायन कैकस काप्य (काव्य) शैव्य एहि पर्येहि आश्मरथ्य औदपान अराल चण्डाल वतण्ड । भोगवद्गौरिमतोः संज्ञायां घादिषु [६ । ३ । ४३] नित्यं ह्रस्वार्थम् । नृनरयोर्वृद्धिश्च ॥ **इति शार्ङ्गरवादिः ॥ ६ ॥**

११६ **क्रौड्यादिभ्यश्च** । ४ । १ । ८० ॥ क्रौडि लाडि व्याडि आपिशलि आपिशिति चौपयत चैटयत (वैटयत) सैकयत वैल्वयत सौधातकि । सूत युवत्याम् । भोज क्षत्रिये । यौतकि कौटि भौरिकि भौलिकि [शाल्मलि] शालास्थलि कापिष्ठलि गौकक्ष्य ॥ **इति क्रौड्यादिः ॥ ७ ॥**

१०९ **अश्वपत्यादिभ्यश्च** ४ । १ । ८४ ॥ अश्वपति [ज्ञानपति] शतपति धनपति गणपति [स्थानपति यज्ञपति] राष्ट्रपति कुलपति गृहपति [पशुपति] धान्यपति धन्वपति [बन्धुपति धर्मपति] सभापति भाणपति क्षेत्रपति ॥ **इत्यश्वपत्यादिः ॥ ८ ॥**

१०५ **उत्स्यादिभ्योऽञ्** ४ । १ । ८६ ॥ उत्स उदपान विकर मिनद महानद महानस महाभाण तरुण तलुन । बष्कयासे । पृथिवी [धेनु] पङ्क्ति जगती त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण । उदस्थान देशे । पृषदंश भल्लकीय रथन्तर मध्यंदिन वृहव् महव् सत्त्वव् कुरु पञ्चाल इन्द्रावसान उष्णह् ककुभ् सुवर्ण देव ग्रीष्मादच्छन्दसि ॥ **इत्युत्स्यादिः ॥ ९ ॥**

१०७ **बाह्वादिभ्यश्च** । ४ । १ । ९६ ॥ बाहु उपबाहु उपबाकु निबाकु शिबाकु वटाकु उपनिन्दु [उपविन्दु] वृषली वृकला चूडा बलाका मूषिका कुशला मगला [छगला] ध्रुवका (धुवका) सुमित्रा दुर्मित्रा पुष्करसद् अनुहरव् देवशर्मन् अग्निशर्मन् (भद्रशर्मन् सुशर्मन्) कुनामन् [सुनामन्] पञ्चन् सप्तन् अष्टन् । अमितौजसः सलो-

पश्च । सुधावत् उदञ्चु शिरस् माष शरावित् मरीची क्षेमवृद्धिन् शृङ्खलतोदिन् खर-नादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजागर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम [उदङ्क] उदकः संज्ञायाम् । संभूयोम्भसोः सलोपश्च ॥ आकृतिग-णोऽयम् ॥ तेन । सात्यकिः जाङ्घिः ऐन्दशर्मिः आजधेनविः इत्यादि ॥ इति वाह्वादयः ॥ १० ॥

१०८ गोत्रे कुञ्जादिभ्यःष्फञ् ॥ ४ । १ ।९८॥कुञ्ज ब्रध्न शङ्ख भस्मन् गण लोमन् शठ शाक शुण्डा शुभ विपाश् स्कन्द स्कम्भ ॥ इति कुञ्जादिः ॥ ११ ॥

१०८ नडादिभ्यः फक् । ४ । १ । ९९ ॥ नड चर [वर] वक मुञ्ज इतिक इतिश उपक [एक] लमक । शलङ्कु शलङ्कं च । सप्तल वाजप्य तिक । अग्निशर्म-न्वृषगणे । प्राण नर सायक दास मित्र द्वीप पिङ्गर पिङ्गल किङ्कर किङ्कल [कातर] कातल काश्यप [कुश्यप] काश्य काल्य [काव्य] अज अमुष्य [अमुष्म] कृष्ण-रणौ ब्राह्मणवासिष्ठे । अमित्र लिगु चित्र कुमार । क्रोष्टु क्रोष्टं च । लोह दुर्ग स्तम्भ शिंशपा अग्र तृण शकट सुमनस् सुमत मिमत ऋच् जलंधर अध्वर युगंधर हंसक दण्डिन् हस्तिन् (पिण्ड) पञ्चाल चमसिन् सुकृत्य स्थिरक ब्राह्मण चटक वदर अश्वल खरप लङ्क इन्ध अस्त्र कामुक ब्रह्मदत्त उदुम्बर शोण अलोह दण्डप ॥ इति नडादिः ॥ १२ ॥

१०८ अनृष्यानन्तर्ये विदादिभ्योऽञ् ॥ ४ । १ ।१०४॥विद उर्व कदय[1] कुशिक भरद्वाज उपमन्यु किलात कन्दर्प [किंदर्भ] विश्वानर [ऋष्टिषेण] ऋष्टिषेण ऋतभाग हर्यश्व मियक आपस्तम्ब कूचवार शरद्वत् शुनक [शुनकृ] धेनु गोपवन शिग्रु विन्दु (भोगक) भाजन [शमिक] अश्वावतान श्यामाक श्यामक्र [श्यावलि] श्यापर्ण हरित किंदास वह्यस्क अर्कजूष [अर्कलूष] वध्योग विष्णु वृद्ध मतिबोध [रथीतर] रथन्तर गविष्ठिर निषाद [शवर अनस] मठर [मृडाकु] सूपाकु मृदु पुनर्भू पुत्र दुहितृ ननान्द । परस्त्री परशुं च ॥इति विदादिः ॥ १३ ॥

१०८ गर्गादिभ्यो यञ्॥४ । १ । १०५॥ गर्ग वत्स । वाजसे । संकृति अज व्याघ्रपात् विदभृत् माचीनयोग (अगस्ति) पुलस्ति चमस रेभ अग्निवेश शङ्ख शट शक धूम एक अवट मनस् धनंजय वृक्ष विश्वावसु जरमाण लोहित शंसित वभ्रु वल्गु मण्डु शङ्ख लिगु गुहल मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायी सूनु कथक कन्थक ऋक्ष वृक्ष (वृक्ष) [तनु] तरुक्ष तलुक्ष तण्ड वतण्ड कपिकत (कपि कत) कुरुकत अनडुह कण्व शकल गोकक्ष अगस्त्य काण्डिनी यज्ञवल्क पर्णवल्क अभयजात विरोहित वृषगण रहूगण शाण्डिल वर्णक (चणक) चुलुक मुद्गल मुसल जमदग्नि पराशर जतूकर्ण (जातूकर्ण) महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा

अदरक (अररक) एलाक पिङ्गल कृष्ण गोलन्द उलूक तितिक्ष भिषज (भिषज्) [भिष्णज] भडित भण्डित दल्भ चेकित चिकित्सित देवहू इन्द्रहू एकलु पिप्पलू वृह-दग्नि [सुलोहिन्] सुलाभिन् उक्थ कुटीगु ॥ **इति गर्गादिः** ॥ १४ ॥

१०९ **अश्वादिभ्यः फञ्** ४ । १ । ११०॥ अश्व अश्मन् शङ्ख शूद्रक विद पुट रोहिण खर्जूर (खजूर) [खञ्जार वस्त] पिजूल भडिल भण्डिल भडित भण्डित [मकृत रामोद] क्षान्त [काश तीक्ष्ण गोलाङ्क अर्क स्वर स्फुट चक्र अविष्ठ] पविन्द पवित्र गोमिन् श्याम धूम धूम्र वाग्मिन् निश्वानर कुट । शप आत्रेये । जन जड खड ग्रीष्म अर्हकित विशंप विशाल गिरि चपल चुप दासक वैल्य (वैल्व) माच्य [धर्म्य] आनहुह्य । पुंसि जाते । अर्जुन [महत] सुमनस् दुर्मनस् मन (मनस्) [मान्त] ध्वन । आत्रेय भरद्वाजे । भरद्वाज आत्रेये । उत्स आतव कितव [वद धन्य पाद] शिव खदिर ॥ **इत्यश्वादिः** ॥ १५ ॥

१०९ **शिवादिभ्योऽण्**॥ ४ । १ । ११२॥ शिव मोष्ठ मोष्ठिक चण्ड जम्भ भूरि दण्ड कुठार ककुभ् (ककुभा) अनभिम्लान कोहित सुख संधि मुनि ककुत्स्थ कहोड कोहड कहुय कहय रोध कपिञ्जल (कुपिञ्जल) खञ्जन वतण्ड तृणकर्ण क्षीरहूद जल-हूद परिल [पथिक] पिष्ट हैहय [पार्षिका] गोपिका कपिलिका जटिलिका वधिरिका मञ्जीरक [मजिरक] वृष्णिक खञ्जार खञ्जाल [कर्मार] रेख लेख आलेखन विश्र-वण रवण वर्तनाक्ष ग्रीवाक्ष [विटप पिटक] विटाक तृक्षाक नभाक ऊर्णनाभ जर-त्कारु [पृथा उत्क्षेप] पुरोहितिका सुरोहितिका सुरोहिका आर्यश्वेत (अर्यश्वेत) सुपिष्ट मसुरकर्ण मयूरकर्ण [खर्जुरकर्ण] कदूरक तक्षन् ऋष्टिषेण गङ्गा विपाश यस्क लह्य द्रुह्य अयस्थूण तृणकर्ण (तृण कर्ण) पर्ण भलन्दन विरूपाक्ष भूमि हला सपत्नी । द्यचो नद्याः ॥ त्रिवेणी त्रिवर्णं च ॥ **इति शिवादिः । आकृतिगणः** ॥ १६ ॥

११० **शुभ्रादिभ्यश्च** ॥ ४ । १ । १२३ ॥ शुभ्र विष्ट पुर (विष्टपुर) ब्रह्मकृत शतद्वार शलाथल शलाकाभ्रू लेखाभ्रू (लेखाभ्र) विकंसा (विकास) रोहिणी रुहिणी धर्मिणी दिश् शालूक अजवस्ति शकन्धि विमातृ विधाव शुक विश देवतर शकुनि शुक उग्र ज्ञातल (शतल) वन्धकी सृकण्डु विस्रि अतिथि गोदन्त कुशाम्ब मकष्टु शाता-हर पवष्टुरिक सुनामन् । लक्ष्मणश्यामयोर्वासिष्ठे । गोधा कृकलास अणीव मवाहण भरत (भारत) भरम मृकण्डु कर्पूर इतर अन्यतर आलीढ सुदन्त सुदक्ष सुवक्षस् सुदामन् कट्टु तुद अकशाय कुमारिका कुठारिका किशोरिका अम्बिका जिह्माशिन् परिधि वायुदत्त शकल शलाका खडूर कुवेरिका अशोका गन्धपिङ्गला खडोन्मत्ता अनुदृष्टिन् (अनुदृष्टि) जरतिन् बलीवर्दिन् विघ्न बीज जीव श्वन् अश्मन् अश्व अजिर ॥ **इति शुभ्रादिः** ॥ **आकृतिगणः** ॥ १७ ॥

१११ **कल्याण्यादीनामिनङ् च**॥४ । १।१२६॥कल्याणी सुभगा दुर्भगा बन्धकी अनुदृष्टि अनुसृति (अनुसृष्टि) जरती वलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री ॥ **इति कल्याण्यादिः ॥ १८ ॥**

१११ **गृष्ट्यादिभ्यश्च** ४ । १ । १३६ ॥ गृष्टि हृष्टि वलि हलि विश्रि कुद्रि अजबस्ति मित्रयु ॥ **इति गृष्ट्यादिः ॥ १९ ॥**

११३ **रेवत्यादिभ्यष्ठक्** ४ । १ । १४६॥ रेवती अश्वपाली मणिपाली द्वारपाली वृक वश्विन् वृकबन्धु वृकग्राह कर्णग्राह दण्डग्राह कुक्कुटाक्ष (ककुदाक्ष) चामरग्राह ॥ **इति रेवत्यादिः ॥ २० ॥**

११४ **कुर्वादिभ्यो ण्यः** ४ । १ । १५१ ॥ कुरु गर्गर मङ्गुष अजमार रथकार वावदूक । सम्राजः क्षत्रिये । कवि मति (विमति) कापिञ्जलादि वाक् वामरथ पितृमत् इन्द्रजाली एजि वातकि दामौष्णीषि गणकारि केशोरि कुट शालका (शलाका) मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी । वेनाच्छन्दसि । शूर्पणाय श्यावनाय श्यावरथ शावपुत्र सत्यंकार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाक शालिन् शालीन कर्तृ हर्तृ इन पिण्डी । तक्षन्।वामरथस्य कण्वादिवत्स्वरवर्जम्॥इति कुर्वादिः॥२१॥

११४ **तिकादिभ्यः फिञ्** ४ । १ । १५४ ॥ तिक कितव संज्ञावालशिख (संज्ञा बाला शिखा) उरस् शाट्य सैन्धव यमुन्द रूप्य ग्राम्य नील अमित्र गोकक्ष कुरु देवरथ तैतिल औरस कौरव्य भौरिकि भौलिकि चौपयत चैटयत शौकयत क्षैतयत वाजवत चन्द्रमस् शुभ गङ्गा वरेण्य सुपामन् आरव्ध वाह्यक स्वल्पक वृष लोमक वादन्य यज्ञ ॥ **इति तिकादिः ॥ २२ ॥**

११४ **वाकिनादीनां कुक्च** ४ । १ । १५८ ॥ वाकिन गौधेर कार्कश काक लङ्का । चर्मिवर्मिणोर्नलोपश्च ॥ **इति वाकिनादिः ॥ २३ ॥**

११५ **कम्बोजाल्लुक्** ४ । १ । १७५ ॥ कम्बोज चोल केरल शक यवन ॥ **इति कम्बोजादिः ॥ २४ ॥**

११५ **न प्राच्यभर्गादियौधेयादिभ्यः** ४ । १ । १७८ ॥

१ भर्ग करूश केकय कश्मीर साल्व सुस्थाल उरस् कौरव्य ॥ **इति भर्गादिः २५**

२ यौधेय शौक्रेय शौभ्रेय ज्यावाणेय धार्तेय धार्तेय त्रिगर्त भरत उशीनर ॥ **इति यौधेयादिः ॥ २६ ॥**

११९ **भिक्षादिभ्योऽण्** ४। २ । ३८॥ भिक्षा गर्भिणी क्षेत्र करीष अङ्गार चर्मन् धर्मन् सहस्र युवति पदाति पद्धति अथर्वन् दक्षिणा भरत विषय श्रोत्र ॥ **इति भिक्षादिः ॥ २७ ॥**

१११ **खण्डिकादिभ्यश्च** ४ । २ ।४५॥खण्डिका वडवा । क्षुद्रकमालवात् सेना-

संज्ञायाम् । भिक्षुक शुक उलूक श्वन् अहन् युगवरत्रा हलवन्धा ॥ इति खण्डिकादिः ॥ २८ ॥

११९ पाशादिभ्यो यः ४ । २ । ४९॥पाश तृण धूम वात अङ्गार पाटल पोत गल पिटक पिटाक शकट हल नट वन ॥ इति पाशादिः ॥ २९ ॥

१२० * खलादिभ्य इनिर्वक्तव्यः * ४ । २ ।५१॥ खल डाक कुटुम्ब शाक कुण्डलिनी ॥ इति खलादिराकृतिगणः ॥ ३० ॥

१२० राजन्यादिभ्यो वुञ् ४ । २ । ५३ ॥ राजन्य आनृत बाभ्रव्य शालङ्कायन दैवयातव (देवयात) [अव्रीड वरत्रा] जालंधरायण [राजायन] तेलु आत्मकामेय अम्बरीषपुत्र वसाति वैल्ववन शैलूष उदुम्बर तीव्र बैल्वल आर्जुनायन संमिय दाक्षि ऊर्णनाभ ॥ इति राजन्यादिः ॥ आकृतिगणः ॥ ३१ ॥

१२० भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ ४ । २ । ५४ ॥

१ भौरिकि भौलिकि चौपयत चौटयत (चैटयत) काणेयं वाणिजक वाणिकाज्य (वालिकाज्य) सैकयत वैकयत ॥ इति भौरिक्यादिः ॥ ३२ ॥

२ ऐषुकारि सारस्यायन (सारसायन) चान्द्रायण द्व्याक्षायण त्र्याक्षायण औडायन जौलायन खाडायन दासमित्रि दासमित्रायण शौद्रायण दाक्षायण शापण्डायन (शाय-ण्डायन) तार्क्ष्यायण शौभ्रायण सौवीर [सौवीरायण] शपण्ड (शयण्ड) शौण्ड शयाण्डि (शयाण्ड) वैश्वमानव वैश्वध्येनव (वैश्वधेनव) नड तुण्डदेव विश्वदेव [सापिण्डि] ॥ इति ऐषुकार्यादिः ॥ ३३ ॥

१२० ऋतूक्थादिसूत्रान्ताट्ठक् ४ । २ । ६० ॥ उक्थ लोकायत न्याय न्यास पुनरुक्त निरुक्त निमित्त द्विपदा ज्योतिष अनुपद अनुकल्प यज्ञ धर्म चर्चा क्रमेतर श्लक्ष (श्लक्ष्ण) संहिता पदक्रम संघट (संघट्ट) वृत्ति परिषद् संग्रह गण [गुण] आयुर्देव (आयुर्वेद) ॥ इत्युक्थादिः ॥ ३४ ॥

१२१क्रमादिभ्यो वुन् ४ । २ । ६१ ॥ क्रम पद शिक्षा मीमांसा साम्न् ॥ इति क्रमादिः ॥ ३५ ॥

१२१ वसन्तादिभ्यष्ठक् ४ । २ । ६३ ॥ वसन्त ग्रीष्म वर्षा शरद शरत् हेमन्त शिशिर प्रथम गुण चरम अनुगुण अथर्वन् अथर्वण॥इति वसन्तादिः॥३६॥

१२२ संकलादिभ्यश्च २ । ४ । ७५ ॥ संकल पुष्कल उत्तम उडुप उद्धेप उत्पुट कुम्भ निधान सुदक्ष सुदत्त सुभूत सुपूत सुनेत्र सुमङ्गल सुपिङ्गल सूत सिकत पूतिका (पूतिक) पूलास कूलास पलाश निवेश गवेश (गवेष) गम्भीर इतर आन् अहन् लोमन् वेमन् चरण (वरुण) बहुल सद्योज अभिषिक्त गोभृत् राजभृत् भल्ल मल्ल माल ॥ इति संकलादिः ॥ ३७ ॥

१२२ सुवास्त्वादिभ्योऽण् ४ । २ । ७७ ॥ सुवास्तु (सुवस्तु) वर्णु भण्डु खण्डु

सेवालिन् कर्पूरिन् शिखण्डिन् गर्त कर्कश शकटीकर्ण कृष्णकर्ण [कर्क] कर्कन्धुमती गोह अहिसक्थ ॥ **इति सुवास्त्वादिः ॥ ३८ ॥**

१२२ वुञ्छणकठाजिलसेनिरढञ्ण्यञ्फक्फञ्ञिञ्ञ्यकक्ठकोऽरीहणकृ-शाश्वर्ष्यकुमुदकाशतृणप्रेक्षाश्मसंखिसंकाशवलपक्षकर्णसुतंगमप्रगोदि-न्वराहकुमुदादिभ्यः ४ । २ । ८० ॥

१ अरीहण (अहीरण) द्रुघण द्रुहण भलग (भगल) उलन्द किरण सांपरायण कौष्ट्रायन औष्ट्रायण त्रैगर्तायन मैत्रायण भास्त्रायण वैमतायण (वैमतायन) गौमतायन सौमता-यन सौसायन धौमतायन सौमायण ऐन्द्रायण कौद्रायण (कौन्द्रायण) खाडायन शाण्डिल्यायन रायस्पोष विपथ विपाश उद्दण्ड उदञ्चन खाण्डवीरण वीरण काशकृत्स्न जाम्बवत शिंशपा रैवत (रेवत) विल्व सुयज्ञ शिरीष वधिर जम्बु खदिर सुशर्मन् (सशर्मन्) भलतृ भलन्दन खण्डु कलन यज्ञदत्त ॥ **इत्यरीहणादिः ॥ ३९ ॥**

२ कृशाश्व अरिष्ट अरिश्म वेश्मन् विशाल लोमश रोमश रोमक लोमक शवल कूट वर्चल सुवर्चल सुकर सूकर मातर (मतर) सदृश पुरग पुराग मुख धूम अजिन विनत अवनत कुविद्यास (कुविटचास्त्र) पराशर अरुस् अयस् मौद्गल्याकर (मौद्गल्य-युक्र) **इति कृशाश्वादिः ॥ ४० ॥**

३ ऋश्य (ह्रष्य) न्यग्रोध शर निलीन [निवास निवात] निधान निबन्धन (नि-बन्ध) [विबद्ध] परिगूढ [उपगूढ] असनि सित मत वेश्मन् उत्तराश्मन् अश्मन् स्थूल बाहु खदिर शर्करा अनडुह (अनड्वाह्) अरडु परिवंश वेणु वीरण खण्ड दण्ड परिवृत्त कर्दम अंशु **इत्यृश्यादिः ॥ ४१ ॥**

४ कुमुद शर्करा न्यग्रोध इक्कट संकट कङ्कट गर्त वीज परिवाप निर्यास शकट कच मधु शिंरीष अश्व अश्वत्थ वल्वज यवास कूप विकङ्कट दशग्राम ॥ **इति कुमुदादिः४२**

५ काश पाश अश्वत्थ पलाश पीयूक्षा चरण वास नड वन कर्दम कच्छूल कङ्कट गुह विस तृण कर्पूर वर्बर मधुर ग्रह कपित्थ जतु सीपाल ॥ **इति काशादिः॥४३॥**

६ तृण नड मूल वन पर्ण वर्ण वराण विल पुल फल अर्जुन अर्ण सुवर्ण वल चरण बुस ॥ **इति तृणादिः ॥ ४४ ॥**

७ प्रेक्षा फलका (हलका) वन्धुका ध्रुवका क्षिपका न्यग्रोध इक्कट कङ्कट सङ्कट कट कूप बुक पुक पुट मह परिवाप यवषि ध्रुवका गर्त कूपक हिरण्य ॥ **इति प्रेक्षादिः ॥ ४५ ॥**

८ अश्मन् यूथ ऊष मीन नद दर्भ वृन्द गुद खण्ड नग शिखा कीट पाम कन्द कान्द कुल गह्व गुड कुण्डल पीन गुह ॥ **इत्यश्मादिः ॥ ४६ ॥**

९ सखि अग्निदत्त वायुदत्त सखिदत्त [गोपिल] भल्लपाल (भल्ल पाल) चक्र चक्रवाक छगल अशोक करवीर वासव वीर पूर वज्र कुशीरक शीहर (सीहर) सरक सरस

समर समल सुरस रोह तमाल कदल सप्तल ॥ **इति सख्यादिः ॥ ४७ ॥**

१० सङ्काश कपिल कश्मीर [समीर]सूरसेन सरक सूर । सुपथिन्पन्थ च । यूप (यूथ) अंश अङ्क नासा पलित अनुनाश अश्मन् कूट मलिन दश कुम्भ शीर्ष चिरन्त (विरत) समल सीर पञ्जर मन्थ नल रोमन् लोमन् पुलिन सुपरि कटिप सकर्णक वृष्टि तीर्थ अगस्ति विकर नासिका ॥ **इति सङ्काशादिः ॥ ४८ ॥**

११ वल चुल नल दल वट लकुल उरल पुख (पुल) मूल उलडुल (उल डुल) वन कुल ॥ **इति बलादिः ॥ ४९ ॥**

१२ पक्ष तुक्ष तुष कुण्ड अण्ड कम्बलिका वलिक चित्र अस्ति । पथः पन्थ च । कुम्भ सीरक सरक सकल सरस समल अतिश्वन् रोमन् लोमन् हस्तिन् मकर लोमक शीर्ष निवात पाक सहक (सिंहक) अङ्कुश सुवर्णक हंसक हिंसक कुत्स विल खिल यमल हस्त कला सकर्णक ॥ **इति पक्षादिः ॥ ५० ॥**

१३ कर्ण वसिष्ठ अर्क अर्कलूष द्रुपद आनडुह्य पाञ्चजन्य स्फिग (स्फिज्) कुम्भी कुन्ती जित्वन् जीवन्त कुलिश आण्डीवद् (आण्डीवत) जव जैत्र आकन (आनक) ॥ **इति कर्णादिः ॥ ५१ ॥**

१४ सुतंगम मुनिचित विमचित महाचित्त महापुत्र स्वन श्वेत गडिक (खडिक) शुक्र विम वीजवापिन् (बीज वापिन्) अर्जुन श्वन् अजिर जीव खण्डित कर्ण विग्रह ॥ **इति सुतंगमादिः ॥ ५२ ॥**

१५ मगदिन् मगदिन् मदादिन् कविल खण्डित गदित चूडार मडार मन्दार कोविदार ॥ **इति प्रगद्यादिः ॥ ५३ ॥**

१६ वराह पलाशा (पलाश) शेरीष (शिरीष) पिनद्ध निवद्ध वलाह स्थूल विदग्ध [विजग्ध] विभग्न [निमग्न] वाहु खदिर शर्करा ॥ **इति वराहादिः ॥५४॥**

१७ कुमुद गोमथ रथकार दशग्राम अश्वत्थ शाल्मलि [शिरीष] मुनिस्थल कुण्डल कूट मधुकर्ण वासकुन्द शुचिकर्ण ॥ **इति कुमुदादिः ॥ ५५ ॥**

१२४ वरणादिभ्यश्च ४ । २ । ८२ ॥ वरणा शृङ्गी शाल्मलि शुण्डी शयाण्डी पर्णी ताम्रपर्णी गोद आलिङ्गयायन जालपदी (जानपदी) जम्बू पुष्कर चम्पा पम्पा वल्गु उज्जयिनी गया मथुरा तक्षशिला उरसा गोमती वलभी ॥ **इति वरणादिः ॥ ५६॥**

१२५ मध्वादिभ्यश्च ४ । २ । ८६ ॥ मधु विस स्थाणु वेणु कर्कन्धु शमी करीर हिम किंशरा शर्याण मरुत् वार्दली शर इष्टका आसुति शक्ति आसन्दी शकल शलाका आमिषी इक्षु रोमन् रुष्टि रुष्य तक्षशिला खड वट वेट॥ **इति मध्वादिः ५७**

१२५ उत्करादिभ्यश्छः ४ । २।९०॥ उत्कर संफल शफर पिप्पल पिप्पलीमूल अश्मन् सुवर्ण खलानिन तिक कितव अणक त्रैवण पिचुक अश्वत्थ काश क्षुद्र भस्त्रा

शाल जन्या अजिर चर्मन् उत्कोश क्षान्त खदिर शूर्पणाय श्यावनाय नैवाकव तृण वृक्ष शाक पलाश विजिगीषा अनेक आतप फल संपर अर्क गर्त अग्नि वैराणक इडा अरण्य निशान्त पर्ण नीचायक शंकर अवरोहित क्षार विशाल वेत्र अरीहण खण्ड वातागार मन्त्रणार्ह इन्द्रवृक्ष नितान्तवृक्ष आर्द्रवृक्ष ॥ **इत्युत्करादिः** ॥ ५८ ॥

१२५ **नडादीनां कुक्च** ४ । २ । ९१ ॥ नड प्लक्ष विल्व वेणु वेत्र वेतस इक्षु काष्ठ कपोत तृण । कुश्चा ह्रस्वत्वं च । तक्षन्नलोपश्च ॥ **इति नडादिः** ॥ ५९ ॥

१२६ **कत्र्यादिभ्यो ढकञ्** ४ । २ । ९५॥कत्रि उम्भि पुष्कर पुष्कल मोदन कुम्भी कुण्डिन नगरी माहिष्मती वर्मती उख्या ग्राम । कुड्याया यलोपश्च ॥ **इति कत्र्यादिः** ॥ ६० ॥

१२६ **नद्यादिभ्यो ढक्** ।४ । २। ९७॥ नदी मही वाराणसी श्रावस्ती कौशाम्बी वनकौशाम्बी काशपरी काशफारी (काशफरी) खादिरी पूर्वनगरी पाठा माया शाल्वदार्वा सेतकी । वडवाया वृषे ॥ **इति नद्यादिः** ॥ ६१ ॥

१२७ **प्रस्थोत्तरपदपलद्यादिकोपधादण** ४।२।११०॥ पलदी परिषद् रोमक बाहीक कलकीट बहुकीट जालकीट कमलकीट कमलकीकर कर्मभिदा गौष्ठी नैकती पारिखा शूरसेन गोमती पटच्चर उदपान यकृल्लोम ॥ **इति पलद्यादिः** ॥ ६२ ॥

काश्यादिभ्यष्ठाञ्ञिठौ ४ । २ । ११५ ॥ काशि चेदि (वेदि) सांयाति संवाह अच्युत मोदमान शकुलाद हस्तिकर्षू कुनामन् हिरण्य करण गोवासन भारद्वी अरिंदम अरित्र देवदत्त दशग्राम शौवावतान युवराज उपराज देवराज मोदन सिन्धुमित्र दासमित्र सुधामित्र सोममित्र छागमित्र साधमित्र (सधमित्र) । आपदादिपूर्वपदात्कालान्तात् । आपद् ऊर्ध्वं तत्॥ **इति काश्यादिः** ॥ ६३ ॥

१२७ **धूमादिभ्यश्च** ४ । २ । १२७ ॥ धूम षडण्ड शशादन आर्जुनाव माहकस्थली आनकस्थली माहिषस्थली मानस्थली अट्टस्थली मद्रकस्थली समुद्रस्थली दाण्डायनस्थली राजस्थली विदेह राजगृह सात्रासाह शप्प मित्रवर्ध्र (मित्रवर्ध) मज्जाली मद्रकूल आजीकूल द्वयहव (द्वयाहाव) त्र्यहव (त्र्याहाव) संस्फाय वर्वर वर्ण्य गर्त आनर्त माठर पाथेय घोष पल्ली आराज्ञी धार्तराज्ञी आवय तीर्थ । कूलात्सौवीरेषु । समुद्रान्नावि मनुष्ये च । कुक्षि अन्तरीप द्वीप अरुण उज्जयनी पट्टार दक्षिणापथ साकेत ॥ **इति धूमादिः** ॥ ६४ ॥

१२९ **कच्छादिभ्यश्च** ४ । २ । ३३ ॥ कच्छ सिन्धु वर्णु गन्धार मधुमत् कम्बोज कश्मीर साल्व कुरु अनुषण्ड द्वीप अनूप अजवाह विजापक कलूतर रङ्कु ॥ **इति कच्छादिः** ॥ ६५ ॥

१२९ **गहादिभ्यश्च** ॥४ । २ । १३८ ॥ गह अन्तस्थ सम विषम मध्य । मध्यं

दिनं चरणे । उत्तम अङ्ग वङ्ग मगध पूर्वपक्ष अपरपक्ष अधमशाख उत्तमशाख एक-शाख समानशाख समानग्राम एकग्राम एकवृक्ष एकपलाश इष्वग्र इष्वनीक अव-स्यन्दन कामप्रस्थ खाडायन काठेरणि लावेरणि सौमित्रि शैशिरि आसुत् दैवशर्मि श्रौति आहिंसि आमित्रि व्याडि वैजि आध्यश्वि आनृशंसि शौङ्गि आग्निशर्मि भौजि वाराटकि वाल्मिकि (वाल्मीकि) क्षैमवृद्धि आश्वत्थि औद्दाहमानि ऐकविन्दवि दन्ताग्र· हंस तत्त्वग्र (तन्त्वग्र·) उत्तर अन्तर (अनन्तर) मुखपार्श्वतसोर्लोपः जनपरयोः कुक्च । देवस्य च । **इति गहादिः** ॥ वेणुकादिभ्यश्छण् ॥ **आकृतिगणः** ॥ ६६ ॥

१३० **संधिवेलाद्यृतुनक्षत्रेभ्योऽण्** ४ । ३ । १६॥ संधिवेला संध्या यमावास्या त्रयोदशी चतुर्दशी पञ्चदशी पौर्णमासी प्रतिपत् । संवत्सरात्फलपर्वणोः ॥ **इति संधिवेलादिः** ॥ ६७ ॥

१३३ **दिगादिभ्यो यत्** ४ । ३ । ५४ ॥ दिश् वर्ग पूग गण पक्ष धाय्य मित्र मेधा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अन्त मुख जघन मेघ यूथ । उदकात्संज्ञायाम् । ज्ञाय (न्याय) वंश वेश काल आकाश ॥ **इति दिगादिः** ॥६८॥

१३३ * **परिमुखादिभ्यश्च** * ४ । ३ । ५९॥परिमुख परिहनु पर्योष्ठ पर्युलूखल परिसीर उपसीर उपस्थूण उपकलाप अनुपथ अनुपद अनुगङ्ग अनुतिल अनुसीत अनुसाय अनुसीर अनुमाष अनुयव अनुयूप अनुवंश प्रतिशाख ॥ **इति परिमु-खादिः** ॥ ६९ ॥

१३३* **अध्यात्मादिभ्यश्च** * ४ । ३ । ६०॥अध्यात्म अधिदेव अधिभूत इह-लोक परलोक ॥ **इत्यध्यात्मादिः आकृतिगणः** ॥ ७० ॥

१३४ **अणृगयनादिभ्यः** ४ । ३ ।७३॥ ऋगयन पदव्याख्यान छन्दोमान छन्दो-भाषा छन्दोविचिति न्याय पुनरुक्त निरुक्त व्याकरण निगम वास्तुविद्या क्षत्रविद्या अङ्गविद्या विद्या उत्पात उत्पाद उद्याव संवत्सर मुहूर्त उपनिषद् निमित्त शिक्षा भि-क्षा ॥ **इति ऋगयनादिः** ॥ ७१ ॥

१३५ **शुण्डिकादिभ्योऽण्** ४ । ३ । ७६ ॥ शुण्डिक कृकण कृपण स्थण्डिल उदपान उपल तीर्थ भूमि तृण पर्ण ॥ **इति शुण्डिकादिः** ॥ ७२ ॥

१३५ **शण्डिकादिभ्यो ञ्यः** ४ । ३ । ९२ ॥ शण्डिक सर्वसेन सर्वकेश शक शट रक शङ्ख बोध ॥ **इति शण्डिकादिः** ॥ ७३ ॥

१३६ **सिन्धुतक्षशिलादिभ्योऽणञौ** ॥ ४ । ३ । ९३ ॥

१ सिन्धु वर्णु मधुमत् कम्बोज साल्व कश्मीर गन्धार किष्किन्धा उरसा दरद (दरद्) गन्दिका ॥ **इति सिन्ध्वादिः** ॥ ७४ ॥

२ तक्षशिला वत्सोद्धरण कैमेंदुर ग्रामणी छगल कोष्टुकर्ण सिंहकर्ण सङ्कुचित किंनर काण्डधार पर्वत अवसान वर्वर कंस ॥ **इति तक्षशिलादिः** ॥ ७५ ॥

१३७ **शौनकादिभ्यश्छन्दसि** ४ । ३ ।१०६ ॥ शौनक वाजसनेय शार्ङ्गरव शापेय शाण्पेय खाडायन स्तम्भस्कन्ध देवदर्शन रज्जुभार रज्जुकण्ठ कठशाठ कषाय तल दण्ड पुरुषांसक अश्वपेज ॥ **इति शौनकादिः** ॥ ७६ ॥

१३७ **कुलालादिभ्यो वुञ्** ४ । ३ । ११८ ॥ कुलाल वरुड चण्डाल निषाद कर्मार सेना सिरिन्ध्र (सिरिध्र) सैरिन्ध्र देवराज पर्षत् (परिषत्) वधू मधु रुरु रुद्र अनड्वह ब्रह्मन् कुम्भकार श्वपाक ॥ **इति कुलालादिः** ॥ ७७ ॥

१३८ **रैवतिकादिभ्यश्छः** ४ । ३ । १३१ ॥ रैवतिक स्वापिशि क्षेमवृद्धि गौरग्रीव (गौरग्रीवि) औदमेधि औदवापि वैजवापि ॥ **इति रैवतिकादिः** ॥ ७८ ॥

१३८ **बिल्वादिभ्योऽण्** ४ । ३ ।१३६ ॥ बिल्व व्रीहि काण्ड मुद्ग मसूर गोधूम इक्षु वेणु गवेधुका कर्पासी पाटली कर्कन्धु कुटीर ॥ **इति बिल्वादिः** ॥ ७९ ॥

१३८ **पलाशादिभ्यो वा** ४ । ३ । १४१ ॥ पलाश खदिर शिंशपा स्पन्दन पूलाक करीर शिरीष यवास विकङ्कत ॥ **इति पलाशादिः** ॥ ८० ॥

१३९ **नित्यं वृद्धशरादिभ्यः** ४ । ३ ।१४४ ॥ शर दर्भ मृद् (मृद्) कुटी तृण सोम वल्वज ॥ **इति शरादिः** ॥ ८१ ॥

१३९ **तालादिभ्योऽण्** ४ । ३ ।१५२ ॥ तालाद्धनुषि । वार्हिण इन्द्रालिश इन्द्राद्दश इन्द्रायुध चय श्यामाक पीयूक्षा ॥ **इति तालादिः** ॥ ८२ ॥

१३९ **प्राणिरजतादिभ्योऽञ्** ४ । ३ । १५४ ॥ रजत सीस लोह उदुम्बर नीप दारु रोहतक विभीतक पीतदारु तीव्रदारु त्रिकण्टक कण्टकार ॥ **इति रजतादिः** ।८३।

१३९ **प्लक्षादिभ्योऽण्** ४ । ३ । १६४ ॥ प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिग्रु रुरु कक्षतु बृहती ॥ **इति प्लक्षादिः** ॥ ८४ ॥

१४० **हरीतक्यादिभ्यश्च** ४ । ३ । १६७ ॥ हरीतकी कोशातकी नखरञ्जनी शष्कण्डी दाडी दोडी श्वेतपाकी अर्जुनपाकी द्राक्षा काला ध्वाक्षा गभीका कण्टकारिका पिप्पली चिम्पा (चिञ्चा) शेफालिका ॥ **इति हरीतक्यादिः** ॥ ८५ ॥

१४०* **माशब्दादिभ्य उपसंख्यानम्** * ४ । ४ । १ ॥ माशब्दः नित्यशब्दः ।कार्यशब्दः ॥ **इति माशब्दादिः** ॥ ८६ ॥

१४०* **आहौ प्रभूतादिभ्यः** * ४ । ४ । १ ॥ प्रभूत पर्याप्त ॥ **इति प्रभूतादिः** ॥ ८७ ॥

१४० * **पृच्छतौ सुस्नातादिभ्यः** *४।४।१॥ सुस्नात सुखरात्रि सुखशयन ॥ **इति सुस्नातादिः** ॥ ८८ ॥

१४० * गच्छतौ परदारादिभ्यः * ४ । ४ । १ ॥ परदार गुरुतल्प ॥ इति परदारादिः ॥ ८९ ॥

१४१ पर्पादिभ्यः ष्ठन् ४ । ४ । १० ॥ पर्प अश्व अश्वत्थ रथ जाल न्यास व्याल । पादः पच्च ॥ इति पर्पादिः ॥ ९० ॥

१४१ वेतनादिभ्यो जीवति ४ । ४ । १२ ॥ वेतन वाहन अर्धवाह धनुर्दण्ड जाल वेश उपवेश प्रेषण उपावस्ति सुख शय्या शक्ति उपनिषद् उपदेश स्फिन् (स्फिज) पाद उपस्थ उपस्थान उपहस्त ॥ इति वेतनादिः ॥ ९१ ॥

१४१ हरत्युत्संगादिभ्यः ४ । ४ । १५ ॥ उत्संग उडुप उत्पुत उत्पन्न उत्पुट पिटक पिटाक ॥ इत्युत्संगादिः ॥ ९२ ॥

१४१ भस्त्रादिभ्यष्ठन् ४ । ४ । १६ ॥ भस्त्रा भरट भरण शीर्षभार शीर्षेभार अंसभार अंसेभार ॥ इति भस्त्रादिः ॥ ९३ ॥

निर्वृत्तेऽक्षद्यूतादिभ्यः ४ । ४ । १९ ॥ अक्षद्यूत [जानूपहत] जङ्घाप्रहत जङ्घाप्रहत पादस्वेदन कण्टकमर्दन गतानुगत गतागत यातोपयात अनुगत ॥ इत्यक्षद्यूतादिः ॥ ९४ ॥

१४३ अण्महिष्यादिभ्यः ४ । ४ । ४८ ॥ महिषी मजापति मजावती मलेपिका विलेपिका अनुलेपिका पुरोहित माणिपाली अनुवारक [अनुचारक] होतृ यजमान ॥ इति महिष्यादिः ॥ ९५ ॥

१४३ किसरादिभ्यष्ठन् ४ । ४ । ५३ ॥ किसर नरद नलद स्थागल तगर गुग्गुलु उशीर हरिद्रा हरिद्रु पर्णी (पर्णी) इति किसरादिः ॥ ९६ ॥

१४३ छत्रादिभ्यो णः ४ । ४ । ६२ ॥ छत्र शिक्षा मरोह स्था बुभुक्षा चुरा तितिक्षा उपस्थान कृषि कर्मन् विश्वधा तपस् सत्य अनृत विशिखा विशिका भक्षा उदस्थान पुरोडा विक्षा चुक्षा मन्द्र ॥ इति छत्रादिः ॥ ९७ ॥

१४५ प्रतिजनादिभ्यः खञ् ४ । ४ । ९९ ॥ प्रतिजन इदंयुग संयुग समयुग परयुग परकुल परस्यकुल अमुष्यकुल सर्वजन विश्वजन महाजन पञ्चजन ॥ इति प्रतिजनादिः ॥ ९८ ॥

१४५ कथादिभ्यष्ठक् ४ । ४ । १०२ ॥ कथा विकथा विश्वकथा संकथा वितण्डा कुष्टविद् (कुष्ठविद्) जनवाद जनेवाद जनोवाद वृत्ति संग्रह गुण गण आयुर्वेद इति कथादिः ॥ ९९ ॥

१४५ गुडादिभ्यष्ठञ् ४ । ४ । १०३ ॥ गुड कुल्माष सक्तु अपूप मांसौदन इक्षु वेणु संग्राम संघात संकाम संवाय प्रवास निवास उपवास ॥ इति गुडादिः ॥ १०० ॥

पञ्चमोऽध्यायः ।

१४६ **उगवादिभ्यो यत्** ५ । १।२। गो हविस् अक्षर विष वर्हिस् अष्टका स्वदा युग मेधा स्नुच् । नाभि नभं च । शुनः संप्रसारणं वा च दीर्घत्वं तत्संनियोगेन चान्तोदात्तत्वम् । ऊधसोऽनङ् च । कूप खद दर खर असुर अध्वन् (अध्वन) क्षर वेद वीज दीस (दीप्त) **इति गवादिः** ॥ १ ॥

१४६ **विभाषा हविरपूपादिभ्यः** ५।१।४॥ अपूप तण्डुल अभ्युष (अभ्यूष) अभ्योष अवोष अभ्येष पृथुक ओदन सूप पूप किण्व मदीप मुसल कटक कर्णवेष्टक इर्गल अर्गल । अन्नविकारेभ्यश्च । यूप स्थूणा दीप अश्व पत्र॥ **इत्यपूपादिः** ॥ २ ॥

१४७ **असमासे निष्कादिभ्यः** ५ । १ । २० ॥ निष्क पण पाद माष वाहा द्रोण षष्टि । **इति निष्कादिः** ॥ ३ ॥

१४९ **गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्** ५ । १ । ३९ ॥ अश्व अश्मन् गण ऊर्णा (उर्म) उमा भङ्गा क्षण (गङ्गा) वर्षा वसु ॥ **इत्यश्वादिः** ॥ ४ ॥

१५० **तद्धरति वहत्यावहति भाराद्वंशादिभ्यः** ५ । १ ।५०॥ वंश कुटज वल्वज मूल स्थूणा स्थूण अक्ष अश्मन् अश्व श्लक्ष्ण इक्षु खट्वा ॥ **इति वंशादिः**॥५॥

१५१ **छेदादिभ्यो नित्यम्** ५ । १ । ६४ ॥ छेद भेद द्रोह दोह नर्त (नर्त) कर्ष तीर्थ संप्रयोग विप्रयोग प्रयोग विप्रकर्ष प्रेषण संप्रश्न विप्रश्न विकर्ष प्रकर्ष । विराग विरङ्ग च ॥ **इति छेदादिः** ॥ ६ ॥

१५१ **दण्डादिभ्योयत्** ५ । १ । ६६ ॥ दण्ड मुसल मधुपर्क कशा अर्घ मेघ मेधा सुवर्ण उदक वध युग गुहा भाग इभ भङ्ग ॥ **इति दण्डादिः** ॥ ७ ॥

१५२ * **महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम्** * ५ । १ । ९४॥ महानाम्नी आदित्यव्रत गोदान ॥ **इति महानाम्न्यादिः** ॥ ८ ॥

१५३ * **अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः** * ५ । १ । ९४ ॥ अवान्तर दीक्षा तिलव्रत देवव्रत ॥ **इत्यवान्तरदीक्षादिः** ॥ ९ ॥

१५३ **व्युष्टादिभ्योऽण्** ५ । १ । ९७ ॥ व्युष्ट नित्य निष्क्रमण प्रवेशन उपसंक्रमण तीर्थ आस्तरण सङ्ग्राम संघात अग्निपद पीलुमूल (पीलु मूल) प्रवास उपवास ॥ **इति व्युष्टादिः** ॥ १० ॥

१५३ **तस्मै प्रभवति संतापादिभ्यः** ५ । १ । १०१ ॥ संताप संनाह संग्राम संयोग संपराय संवेशन संपेष निष्पेष सर्ग निसर्ग विसर्ग उपसर्ग प्रवास उपवास संवात संवेष संवास संमोदन सक्तु । मांसौदनाद्गृहीतादपि ॥ **इति संतापादिः** ॥ ११ ॥

१५३ * **तदप्रकरणे उपवस्त्रादिभ्य उपसंख्यानम्** * ५ । १ । १०५ ॥ उपवस्त्र प्राशित्र चूडा श्रद्धा ॥ **इत्युपवस्त्रादिः** ॥ १२ ॥

१५४ **अनुप्रवचनादिभ्यश्छः** ५। १।१११॥अनुप्रवचन उत्थापन उपस्थापन संवेशन प्रवेशन अनुप्रवेशन अनुवासन अनुवचन अनुवाचन अन्वारोहण प्रारम्भण आरम्भण आरोहण ॥ **इत्यनुप्रवचनादिः** ॥ १३ ॥

१५४ * **स्वर्गादिभ्यो यद्वक्तव्यः*** ५। १ । १११ ॥स्वर्ग यशस् आयुस् काम धन ॥ **इति स्वर्गादिः** ॥ १४ ॥

१५४ * **पुण्याहवाचनादिभ्यो लुग्वक्तव्यः** * ५। १।१११॥पुण्याहवाचन स्वस्तिवाचन शान्तिवाचन ॥ **इति पुण्याहवाचनादिः** ॥ १५ ॥

१५५ **पृथ्वादिभ्य इमनिज्वा** । ५। १।११२ ॥ पृथु मृदु महत् पटु तनु लघु बहु साधु आशु उरु गुरु बहुल खण्ड दण्ड चण्ड अकिंचन बाल होड पाक वत्स मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु ॥ **इति पृथ्वादिः** ॥ १६ ॥

१५५ **वर्णदृढादिभ्यः ष्यञ्च** ५। १।१२३॥दृढ वृढ परिवृढ मृढ कृश वक्र शुक्र चुक्र आम्र कष्ट लवण ताम्र शीत उष्ण जड बधिर पण्डित मधुर मूर्ख मूक स्थिर। वेर्यातलातमतिर्मनःशारदानाम् । समो मतितमनसोः। जवन॥**इति दृढादिः** ॥१७॥

१५५ **गुणवचनब्राह्मणादिभ्यः कर्मणि च** ५। १ । १२४॥ ब्राह्मण वाडव माणव । अर्हतो नुम्च । चोर धूर्त आराधय विराधय अपराधय उपराधय एकभाव द्विभाव त्रिभाव अन्यभाव अक्षेत्रज्ञ संवादिन् संवेशिन् संभाषिन् बहुभाषिन् शीर्षघातिन् विघातिन् समस्थ विषमस्थ परमस्थ मध्यमस्थ अनीश्वर कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ निश्र बालिश अलस दुःपुरुष कापुरुष राजन् गणपति अधिपति गडुल दायाद विशस्ति विषम विपात निपात । सर्ववेदादिभ्यः स्वार्थे । चतुर्वेदस्योभयपदवृद्धिश्च । शौटीर ॥ **आकृतिगणोऽयम्** ॥ **इति ब्राह्मणादिः** ॥ १८ ॥

१५५* **चतुर्वेदादिभ्य उभयपदवृद्धिश्च** * ५। १ । १२४ ॥ चतुर्वेद चतुर्वर्ण चतुराश्रम सर्वविद्य त्रिलोक त्रिस्वर षड्गुण सेना अनन्तर संनिधि समीप उपमा सुख तदर्थ इतिह मणिक ॥ **इति चतुर्वेदादिः** ॥ १९ ॥

१५६ **पत्यन्तपुरोहितादिभ्यो यक्** ५। १ । १२८॥ पुरोहित । राजासे । ग्रामिक पिण्डिक सुहित बालमन्द (बाल मन्द) खण्डिक दण्डिक वर्मिक कर्मिक धर्मिक शीलिक सूतिक मूलिक तिलक अञ्जलिक (अन्तलिक) रूपिक ऋषिक पुत्रिक अविक छत्रिक पर्षिक पथिक चर्मिक प्रतिक सारथि आस्तिक सूचिक संरक्ष सूचक (संरक्षसूचक) नास्तिक अजानिक शाकर नागर चूडिक॥**इति पुरोहितादिः**॥२०॥

१५६ **प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्** ५। १। १२९ ॥ उद्गातृ उन्नेतृ प्रतिहर्तृ प्रशास्तृ होतृ पोतृ हर्तृ रथगणक पत्तिगणक सुष्ठु दुष्ठु अध्वर्यु वधू। सुभग मन्त्र ॥ **इत्युद्गात्रादिः** ॥ २१ ॥

१५६ हायनान्तयुवादिभ्योऽण् ५ ।१।१३०॥ युवन् स्थविर होतृ यजमान । पुरुषासे । भ्रातृ कुतुक श्रमण (श्रवण) कटुक कमण्डलु कुक्षी सुक्षी दुःक्षी सुहृदय दुर्हृदय सुहृद् दुर्हृद् सुभ्रातृ दुर्भ्रातृ वृषल परिव्राजक सब्रह्मचारिन् अनृशंस । हृदयासे कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ।श्रोत्रियस्य यलोपश्च॥**इति युवादिः॥२२॥**

१५६ द्वन्द्वमनोज्ञादिभ्यश्च ५ । १।१३३॥मनोज्ञ प्रियरूप अभिरूप कल्याण मेधाविन् आढ्य कुलपुत्र छान्दस छात्र श्रोत्रिय चोर धूर्त विश्वदेव युवन् कुपुत्र ग्रामपुत्र ग्रामकुलाल ग्रामड (ग्रामषण्ड) ग्रामकुमार सुकुमार बहुल आश्वपुत्र अमुष्यपुत्र आमुष्यकुल सारपत्र शतपुत्र ॥ **इति मनोज्ञादिः ॥ २३ ॥**

१५८ तस्य पाकमूले पील्वादि[1]कर्णादि[2]भ्यः कुणञ्जाहचौ५।२ । २४॥

१ पीलु कर्कन्धू (कर्कन्धु) शमी करीर वल (कुवल) वदर अश्वत्थ खदिर ॥ **इति पील्वादिः ॥ २४ ॥**

२ कर्ण अक्षि नख मुख केश पाद गुल्फ भ्रू शृङ्ग दन्त ओष्ठ पृष्ठ॥**इति कर्णादिः२५॥**

१५९ तदस्य संजातं तारकादिभ्य इतच् ५ ।२।३६॥तारका पुष्प कर्णक मञ्जरी ऋजीष क्षण सूच सूत्र निष्क्रमण पुरीष उच्चार प्रचार विचार कुड्मल कण्टक मुसल मुकुल कुसुम कुतूहल स्तवक (स्तवक) किसलय पल्लव खण्डवेग निद्रा मुद्रा बुभुक्षा धेनुष्या पिपासा श्रद्धा अभ्र पुलक अङ्गारक वर्णक द्रोह दोह सुख दुःख उत्कण्ठा भर व्याधि वर्मन् व्रण गौरव शास्त्र तरङ्ग तिलक चन्द्रक अन्धकार गर्व कुमुर (मुकुर) हर्ष उत्कर्ष रण कुवलय गर्ध क्षुध् सीमन्त ज्वर गर रोग रोमाञ्च पण्डा कज्जल तृष् कोरक कल्लोल स्थपुट फल कञ्चुक शृङ्गार अङ्कुर शैवल वकुल श्वभ्र अराल कलङ्क कर्दम कन्दल मूर्च्छा अङ्गार हस्तक प्रतिबिम्ब विघ्नतन्त्र प्रत्यय दीक्षा गर्ज । गर्भादप्राणिनि ॥ **इति तारकादिः आकृतिगणः ॥ २६ ॥**

१६० विमुक्तादिभ्योऽण् ५ । २।६१॥ विमुक्त देवासुर रक्षोसुर उपसद सुवर्ण परिसारक सदसत् वसु मरुत् पत्नीवत् वसुमत् महीयत्त्व सत्त्वत् बर्हवत् दशार्ण दशार्ह वयस् हविर्धान पतत्रिन् महित्री अस्यहत्य सोमापूषन् इडा अग्नाविष्णू उर्वशी वृत्रहन् ॥ **इति विमुक्तादिः ॥ २७ ॥**

१६१गोषदादिभ्योवुन्५।२।६२॥गोषद इषेत्वा मातरिश्वन् देवस्यत्वा देवीरापः कृष्णोस्याखरेष्ठः देवींधिया (देवींधियम्) रक्षोहण युञ्जान अञ्जन प्रभूत प्रतूर्त कृशानु (कृशाकु) ॥ **इति गोषदादिः ॥ २८ ॥**

१६१आकर्षादिभ्यः कन् ५। २ ।६४॥आकर्ष (आकष) त्सरु पिशाच पिचण्ड अशनि अश्मन् निचय जय चय विजय आचय नय पाद दीप ह्रद ह्राद ह्लाद गद्गद शकुनि ॥ **इत्याकर्षादिः ॥ २९ ॥**

१६२ **इष्टादिभ्यश्च** ॥ ५ । २ । ८८ ॥ इष्ट पूर्त उपासादित निगदित परिगदित परिवादित निकथित निषादित निपठित संकलित परिकलित संरक्षित परिरक्षित अर्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित ॥ **इतीष्टादिः** ॥ ३० ॥

१६२ **रसादिभ्यश्च** ॥ ५ ॥ २ । ९५ ॥ रस रूप वर्ण गन्ध स्पर्श शब्द स्नेह भाव । गुणात् एकाचः ॥ **इति रसादिः** ॥ ३१ ॥

१६३ **सिध्मादिभ्यश्च** । ५ । २ । ९७ ॥ सिध्म गडु मणि नाभि बीज वीणा कृष्ण निष्पाव पांसु पार्श्व पर्शू हनु सक्तु मास (मांस) । पार्ष्णिघमन्योर्दीर्घश्च । वातदन्तबल-ललाटानामूङ् च । जटाघटाकटाकालाः क्षेपे । पर्ण उदक प्रज्ञा सक्थि कर्ण स्नेह शीत श्याम पिङ्ग पित्त पुष्क पृथु मृदु मश्रु मण्ड पत्र चटु कपि गण्डु ग्रन्थि श्री कुश धार वर्ष्मन् पक्ष्मन् श्लेष्मन् पेश निष्पाद् कुण्ड । क्षुद्रजन्तूपतापयोश्च ॥ **इति सिध्मादिः** ॥ ३२ ॥

१६३ **लोमादिपामादिपिच्छादिभ्यः शनेलचः** ५ । २ । १०० ॥

१ लोमन् रोमन् बभ्रु हरि गिरि कर्क कपि मुनि तरु ॥ **इति लोमादिः** ॥ ३३ ॥

१ पामन् वामन् वेमन् हेमन् श्लेष्मन् कद्रु (कद्रू) वलि सामन् ऊष्मन् कृमि । अ-ङ्गात्कल्याणे । शाकीपलालीदद्रूणां ह्रस्वत्वं च । विष्वगित्युत्तरपदलोपश्चाकृतसंधेः । लक्ष्म्या अच्च ॥ **इति पामादिः** ॥ ३४ ॥

३ पिच्छा उरस् ध्रुवक ध्रुवक । जटाघटाकालाः क्षेपे । वर्ण उदक पङ्क प्रज्ञा ॥ **इति पिच्छादिः** ॥ ३५ ॥

१६४ * **ज्योत्स्नादिभ्य उपसंख्यानम्** * ५ । २ । १०३ ॥ ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका ॥ **इति ज्योत्स्नादिः** ॥ ३६ ॥

१६५ **व्रीह्यादिभ्यश्च** ५ । २ । ११६ ॥ व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा बलाका यवखदनौ कुमारी । शीर्षान्नञः ॥ **इति व्रीह्यादिः** ॥ ३७ ॥

१६५ **तुन्दादिभ्य इलच्च** ५ । २ । ११७ ॥ तुन्द उदर पिचण्ड यव व्रीहि । स्वाङ्गादिवृद्धौ ॥ **इति तुन्दादिः** ॥ ३८ ॥

१६६ **अर्शआदिभ्योऽच्** ५ । २ । १२७ ॥ अर्शस् उरस् तुन्द चतुर पलित जटा घटा घाटा अभ्र अघ कर्दम अम्ल लवण । स्वाङ्गाद्धीनात् । वर्णात् । **इत्यर्शआदिः** ॥ **आकृतिगणः** ॥ ३९ ॥

१६६ **सुखादिभ्यश्च** ५ । २ । १३१ ॥ सुख दुःख तृप्त कृच्छ्र अस्र (आश्र) आस्र अलीक कठण सोढ मतीप शील हल । माला क्षेपे । कृपण मणाय (मणय) दल कक्ष **इति सुखादिः** ॥ ४० ॥

१६६ **पुष्करादिभ्यो देशे** । ५ । २ । १३५ ॥ पुष्कर पद्म उत्पल तमाल कुमुद नड कपित्थ बिस मृणाल कर्दम शालूक विगर्ह करीष शिरीष यवास प्रवाह हिरण्य कैरव कल्लोल तट तरङ्ग पङ्कज सरोज राजीव नालीक सरोरुह पुटक अरविन्द अम्भोज अब्ज कमल पयस् ॥ **इति पुष्करादिः** ॥ ४१ ॥

१६६ **बलादिभ्यो मतुबन्यतरस्याम्** ५ । २ । १३६ ॥ वल उत्साह उद्भास उद्भास शिखा कुल चूडा सुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध ॥ **इति बलादिः** ॥ ४२ ॥

१६७ * **दक्षिग्रहणाद्भवदादियोग एव** * ५ । ३ । १४ ॥ भवान् दीर्घायुः देवानांप्रिय आयुष्मान् ॥ **इति भवदादिः** ॥ ४३ ॥

१७३ **देवपथादिभ्यश्च** ५ । ३ । १०० ॥ देवपथ हंसपथ वारिपथ रथपथ स्थलपथ करिपथ अजपथ राजपथ शतपथ शङ्कुपथ सिन्धुपथ सिद्धगति उष्ट्रग्रीव वामरज्जु हस्त इन्द दण्ड पुष्प मत्स्य ॥ **इति देवपथादिः** ॥ **आकृतिगणः** ॥ ४४ ॥

१७३ **शाखादिभ्यो यः** ५ । ३ । १०३ ॥ शाखा मुख जघन शृङ्ग मेघ अभ्र चरण स्कन्ध स्कद (स्कन्द) उरस् शिरस् अग्र शाण ॥ **इति शाखादिः** ॥ ४५ ॥

१७३ **शर्करादिभ्योऽण्** ५ । २ । १०७ ॥ शर्करा कपालिका कपिष्ठिका (कनिष्ठिका) पुण्डरीक शतपत्र गोलोमन् लोमन गोपुच्छ नराची नकुल सिकता ॥ **इति शर्करादिः** ॥ ४६ ॥

१७३ **अङ्गुल्यादिभ्यष्ठक्** ५ । ३ । १०८ ॥ अङ्गुली भरुज वभ्रु वल्गु मण्डर मण्डल शष्कुली हरि कपि मुनि रुह खल उदश्वित् गोणी उरस् कुलिश ॥ **इत्यङ्गुल्यादिः** ॥ ४७ ॥

१७४ **दामन्यादित्रिगर्तषष्ठाच्छः** ५ । ३ । ११६ ॥ दामनि औलपि वैजवापि औदकि औदञ्जि अच्युतन्ति (आच्युतन्ति) अच्युतदन्ति (आच्युतदन्ति) शाकुन्तकि आकिदन्ति औडवि काकदन्तकि शात्रुतपि सर्वासेनि विन्दु वैन्दवि तुलभ मौञ्जायन काकन्दि सावित्रीपुत्र ॥ **इति दामन्यादिः** ॥ ४८ ॥

१७४ **पर्श्वादियौधेयादिभ्योऽणञौ** ५ । ३ । ११७ ॥

१ पर्शु असुर रक्षस् वाह्लीक वयस् वसु मरुत् सत्त्वत् दशार्ह पिशाच अशनि कर्षापण॥ **इति पर्श्वादिः** ॥ ४९ ॥

२ यौधेय कौशेय शौक्रेय शौभ्रेय धार्तेय घार्तेय ज्यावाणेय त्रिगर्त भरत उशीनर ॥ **इति यौधेयादिः** ॥ ५० ॥

१७४ **स्थूलादिभ्यः प्रकारवचने कन्** ५ । ४ । ३ ॥ स्थूल अनु अणु माषेषु (माष इषु) कृष्ण तिलेषु । यव व्रीहिषु । इक्षु तिल । पाद्यकालावदातसुरायाम् । गोमुत्र

आच्छादने । सुरा अहौ जीर्णशालिषु । पत्रमूल समस्तो व्यस्तश्च । कुमारीपुत्र कुमारीश्वशुरमणि ॥ **इति स्थूलादिः ॥ ५१ ॥**

१७६ यावादिभ्यः कन् ५ । ४। २९॥याव मणि अस्थि तालु जानु सान्द्र पीत स्तम्ब । ऋतावुष्णशीते । पशौ लूनविपाते । अणु निपुणे । पुत्र कृत्रिमे । स्नात वेदसमासौ । शून्य रिक्ते । दान कुत्सिते । तनु सूत्रे ईयसश्च । ज्ञात अज्ञात । कुमारीक्रीडनकानि च (कुमारक्रीडनकानि च) ॥ **इति यावादिः ॥ ५२ ॥**

१७६ विनयादिभ्यष्ठक् ५ । ४ । ३४ ॥ विनय समय । उपायोद्गूस्वत्वं च । संमति संगति कथंचित् अकस्मात् समाचार उपचार समाय । (समयाचार) व्यवहार संप्रदान समुत्कर्ष समूह विशेष अत्यय ॥ **इति विनयादिः ॥ ५३ ॥**

१७७ प्रज्ञादिभ्यश्च ५ । ४ । ३८ ॥ मज्ञ वणिज् उशिज् उष्णिज् मत्यक्ष विद्वस् वेदन् षोडन् विद्या मनस् । श्रोत्र शरीरे । जुह्वत् । कृष्ण मृगे । चिकीर्षत् । चोर शत्रु योध चक्षुस् वसु एनस् मरुत् क्रुञ्च सत्वत् दशार्ह वयस् व्याकृत असुर रक्षस् पिशाच अशनि कर्षापण देवता बन्धु ॥ **इति प्रज्ञादिः ॥ ५४ ॥**

१७७* आद्यादिभ्य उपसंख्यानम् * ५ । ४ । ४४॥आदि मध्य अन्त पृष्ठ पार्श्व ॥ **इत्याद्यादिः आकृतिगणः ॥ ५५ ॥**

६८ अव्ययीभावे शरत्प्रभृतिभ्यः ५ । ४।१०७॥शरद् विपाश् अनस् मनस् उपानह् अनडुह् दिव् हिमवत् हिरुक् विद् सद् दिश् दृश् विश् चतुर् त्यद् तद् यद् कियत् । जराया जरश्च । प्रतिपरसमनुभ्योऽक्ष्णः । पथिन् ॥ **इति शरदादिः ५६॥**

८७ द्विदण्ड्यादिभ्यश्च ५।४।१२८॥ द्विदण्डि द्विमुसलि उभाञ्जलि उभयाञ्जलि उभादन्ति उभयादन्ति उभाहस्ति उभयाहस्ति उभाकर्णि उभयाकर्णि उभापाणि उभयापाणि उभाबाहु उभयाबाहु एकपदि प्रोष्ठपदि आढ्यपदि (आढ्यपदि) सपदि निकुञ्चकर्णि संहतपुच्छि अन्तेवासि ॥ **इति द्विदण्ड्यादिः ॥५७॥**

८७ पादस्य लोपोऽहस्त्यादिभ्यः ५ । ४। १३८॥हस्तिन् कुद्दाल अश्व कशिक कुरुत कटोल कटोलक गण्डोल गण्डोलक कण्डोल कण्डोलक अज कपोत जाल गण्ड महेला दासी गणिका कुसूल ॥ **इति हस्त्यादिः ॥ ५८ ॥**

८७ कुम्भपदीषु च ५ । ४।१३९॥कुम्भपदी एकपदी जालपद शूल्कपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितिपदी विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुणिपदी कृष्णपदी शुचिपदी द्रोणीपदी (द्रोणपदी) द्रुपदी सूकरपदी शकृत्पदी अष्टापदी स्थूणापदी अपदी सूचीपदी ॥ **इति कुम्भपद्यादिः ॥ ५९ ॥**

८८ उरःप्रभृतिभ्यः कप्५।४।१५१॥उरस् सर्पिस् उपानह्पुमान् अनड्वान् पयः नौः लक्ष्मीः दधि मधु शाली शालिः । अर्थान्नञः ॥ **इत्युरःप्रभृतयः ॥६०॥**

षष्ठोऽध्यायः ।

७ * **शकन्ध्वादिषु पररूपं वाच्यम्** * ६ । १ । ९४ ॥ शकन्धुः कर्कन्धुः कुलटा । सीमन्तः केशवेशे । हलीषा मनीषा लाङ्गलीषा पतञ्जलिः।सारङ्गः पशुपक्षिणोः॥ **इति शकन्ध्वादिः** ॥ १ ॥

१०४ **पारस्करप्रभृतीनि च संज्ञायाम्** । ६ । १। १५७॥पारस्करो देशः । कारस्करो वृक्षः । रथस्था नदी । किष्कुः प्रमाणम् । किष्किंधा गुहा । तद्धृतोः करप-त्योश्चोरदेवतयोः सुट् तलोपश्च । भ्रातुष्पतौ गवि कर्तरि॥**इति पारस्करादिः** ॥२॥

१८६ **उञ्छादीनां च** । ६ । १ । १६० ॥ उञ्छ म्लेच्छ नञ्र नल्प (जल्प) जप वध । युग कालविशेषे रथाद्युपकरणे च । गरो दूष्ये । वेदवेगवेष्टबन्धाः करणे । स्तुथुद्रुवश्छन्दसि । वर्तनि स्तोत्रे । श्वभ्रे दरः । साम्वतापौ भावगर्हायाम्।उत्तमशश्वत्तमौ सर्वत्र । भक्षमन्थभोगमन्थाः ॥ **इत्युञ्छादिः** ॥ ३ ॥

१८७ **वृषादीनां च** ६ । १ । २०३ ॥ वृषः जनः ज्वरः ग्रहः हयः गयः नयः तायः तयः चयः अमः वेदः सूदः अंशः गुहा । शमरणौ संज्ञायाम्।संमतौ भावकर्मणोः। मन्त्रः शान्तिः कामः यामः आरा धारा कारा वहः कल्पः पादः ॥ **इति वृषादिः**॥ **आकृतिगणः** ॥ अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम् ॥ ४ ॥

१९५ **विस्पष्टादीनि गुणवचनेषु** । ६ । २ । २४ ॥विस्पष्ट विचित्र विचित्त व्यक्त संपन्न पटु पण्डित कुशल चपल निपुण ॥ **इति विस्पष्टादिः** ॥ ५ ॥

१९६ **कार्तकौजपादयश्च** ६ । २ । ३७ ॥ कार्तकौजपौ सावर्णिमाण्डकेयौ (सावर्णिमाण्डूकेयौ) अवन्त्यश्मकाः पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपा-श्वालेयाः कटुकवाधूलेयाः शाकलशुनकाः शाकलशणकाः शणकबाभ्रवाः आर्चाभिमौ-द्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्का-यनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौथुमलोकाक्षाः स्त्रीकुमारम् मौदपै-प्पलादाः वत्सजरन्तः सौश्रुतपार्थिवाः जरामृत्यू याज्यानुवाक्ये ॥ **इति कार्तकौज-पादिः** ॥ ६ ॥

१९७कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपा पारेवडवा तैतिल-कद्रूः **पण्यकम्बलो दासीभाराणां च** ६ । २ । ४२॥ दासीभारः देवहूतिः देव-भीतिः देवलातिः वसुनीतिः (वसूनितिः) ओषधिः चन्द्रमाः॥ **इति दासीभारादिः आकृतिगणः** ॥ ७ ॥

२०० **युक्तारोह्यादयश्च** ६ । २ । ८१ ॥ युक्तारोही आगतरोही आगतयोधी आगतवञ्ची आगतनन्दी आगतप्रहारी आगतममत्स्यःक्षीरहोता भगिनीभर्ता ग्रामगोधुक्

अश्वत्रिरात्रः गर्गत्रिरात्रः व्युष्टित्रिरात्रः गणपादः एकशितिपाद् । पात्रेसमितादयश्च ॥ **इति युक्तारोह्यादिः ॥ आकृतिगणः ॥ ८ ॥**

२०० घोषादिषु च ६ । २ । ८५ ॥ घोष घट (कट) वल्लभ हूद बदरी पिङ्गल (पिंगली) पिशङ्ग माला रक्षा शाला (वृट्) कुट कूट शाल्मली अश्वत्थ तृण शिल्पी मुनि मेक्षाकू (मेक्षा) ॥ **इति घोषादिः ॥ ९ ॥**

२०० छात्र्यादयः शालायाम् । ६ । २ । ८६ ॥ छात्रि पेलि भाण्डि व्याडि आखण्डि आटि गोमि ॥ **इति छात्र्यादिः ॥ १० ॥**

प्रस्थेऽवृद्धमकर्क्यादीनाम् । ६ । २ । ८७ ॥ कर्कि (कर्की) मन्नी मकरी कर्कन्धु शमी करीरि (करीर) कन्दुक कुबल (कवल) बदरी ॥ **इति कर्क्यादिः ॥ ११ ॥**

२०० मालादीनां च । ६ । २ । ८८ ॥ माला शाला शोणा (शोण) द्राक्षा स्राक्षा शामा काञ्ची एक काम दिवोदास वध्यश्च ॥ **इति मालादिः ॥ आकृतिगणः ॥ १२ ॥**

२०३ ऋत्वादयश्च ६ । २ । ११८ ॥ क्रतु दृशीक मतीक मतूर्ति हव्य भव्य भग ॥ **इति ऋत्वादिः ॥ १३ ॥**

२०३ आदिश्चिहणादीनाम् ६ । २ । १२५ ॥ चिहण मदुर मद्गुमर वैतुल पटत्क वैडालिकर्णक वैडालिकर्णि कुक्कुट चिक्कण चित्कण ॥ **इति चिहणादिः ॥ १४ ॥**

२०४ वर्ग्यादयश्च ६ । २ । १३१ ॥ दिगादिषु वर्गादयस्त एव कृतयदन्ता वर्ग्यादयः ॥ १५ ॥

२०४ चूर्णादीन्यप्राणिषष्ठ्याः ६ । २ । १३४ ॥ चूर्ण करिष करीष शाकिन शाकट द्राक्षा तूस्त कुन्दम दलप चमसी चक्कन चौल ॥ **इति चूर्णादिः ॥ १६ ॥**

२०५ उभे वनस्पत्यादिषु युगपत् ६ । २ । १४० ॥ वनस्पतिः वृहस्पतिः शचीपतिः तनूनपात् नराशंसः शुनःशेपः शण्डामर्कौ तृष्णावरूत्री लम्बाविश्ववयसौ मर्मृत्युः ॥ **इति वनस्पत्यादिः ॥ १७ ॥**

२०५ संज्ञायामनाचितादीनाम् ६ । २ । १४६ ॥ आचित पर्याचित आस्थापित परिगृहीत निरुक्त प्रतिपन्न अपश्लिष्ट प्रश्लिष्ट उपहित उपस्थित संहितागवि ॥ **इत्याचितादिः ॥ १८ ॥**

२०६ प्रवृद्धादीनां च ६ । २ । १४७ ॥ प्रवृद्धं यानम् । प्रवृद्धो वृषलः । प्रयुताशूण्वः । आकर्षे अवहितः । अवहितो भोगेषु खट्वारूढः । कविशस्तः ॥ **इति प्रवृद्धादिः ॥ आकृतिगणोऽयम् ॥** तेन । प्रवृद्धं यानम् । अप्रवृद्धो वृषकृतो रथ इत्यादिः ॥ १९ ॥

२०७ कृत्योकेष्णुच्चार्वादयश्च ६ । २ । १६० ॥ चारु साधु यौधिक (यौधकि) अनङ्गमेजय वदान्य अकस्मात् । वर्तमानवर्धमानत्वरमाणध्रियमाणक्रियमाणरोचमान-

शोभमानाः संज्ञायाम् । विकारसदृशे व्यस्तसमस्ते । गृहपति गृहपतिक । राजाह्नोश्छन्दसि ॥ इति चार्वादिः ॥ २० ॥

२०८ न गुणादयोऽवयवाः ६।२।१७६॥गुण अक्षर अध्याय सूक्त छन्दोमान ॥ इति गुणादिः । आकृतिगणः ॥ २१ ॥

२०९ निरुदकादीनि च ६ । २ । १८४॥निरुदक निरुपल निर्मक्षिक निर्मशक निष्कालक निष्कालिक निष्पेष दुस्तरीप निस्तरीप निस्तरीक निरजिन उदजिन उपाजिन । परेर्हस्तपादकेशकर्षाः ॥ इति निरुदकादिः॥ आकृतिगणः ॥ २२ ॥

२०९ प्रतेरंश्वादयस्तत्पुरुषे ६ । २ । १९३ ॥ अंशु जन राजन् उष्ट्र खेटक अजिर आर्द्रा श्रवण कृत्तिका अर्धपुर ॥ इत्यंश्वादिः ॥ २३ ॥

२०९ उदाद्रुचजाजिनमगौरादयः ६।२।१९४॥गौर तैष तैल लेट लोट जिह्वा कृष्ण कन्या गुध कल्प पाद ॥ इति गौरादिः ॥ २४ ॥

२१० * त्रिचक्रादीनां छन्दस्युपसंख्यानम् * ६ ।२।१९९॥त्रिचक्र त्रिवृत् त्रिवङ्कर ॥ इति त्रिचक्रादिः ॥ आकृतिगणः ॥ २५ ॥

८२ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ६ ।३ ।३४ ॥प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामा अबला तनया ॥ इति प्रियादिः ॥ २६ ॥

८३तसिलादिष्वाकृत्वसुचः३।३।३५॥ तसिल् त्रल् तरप् तमप् चरट् जातीयर् कल्पप् देशीयर् रूपप् पाशप् थल् थाल् दार्हिल् तिल् थ्यन्॥इति तसिलादयः॥२७॥

८४ * कुक्कुटचादीनामण्डादिषु * ६ । ३ ।४२॥ कुक्कुटी मृगी काकी अण्ड पद शाव भुकुंस भृकुटी ॥ इति कुक्कुटचादिरण्डादिश्च ॥ २८ । २९ ॥

१०१ पृषोदरादीनि यथोपदिष्टम् ६ । ३।१०९॥पृषोदर पृषोत्थान बलाहक जीमूत श्मशान उलूखल पिशाच बृसी मयूर ॥ इति पृषोदरादिः ॥ आकृतिगणः ॥ ३० ॥

१०२ वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् ६ । ३ । ११७ ॥
१ कोटर मिश्रक सिश्रक पुरग सारिक (शारिक) इति कोटरादिः ॥ ३१ ॥
२ किंशुलुक शाल्व नड अञ्जन भञ्जन लोहित कुक्कुट॥इति किंशुलुकादिः ॥३२॥

१०२ मतौ बह्वचोऽनजिरादीनाम् ६ ।३ ।११९॥अजिर खदिर पुलिन हंसक (हंस) कारण्ड (कारण्डव) चक्रवाक ॥ इत्यजिरादिः ॥ ३३ ॥

१०२ शरादीनां च६।३।१२०॥शर वंश धूम अहि कपि मणि मुनि शुचि हनु॥ इति शरादिः ॥ ३४ ॥

१०२ * अपील्वादीनामिति वक्तव्यम् * ६ । ३ । १२१॥ पीलु दारु रुचि चारु गम् कम् ॥ इति पील्वादिः ॥ ३५ ॥

१२५ बिल्वकादिभ्यश्छस्य लुक् ६ । ४ । १५३ ॥ छविधानार्था ये नडादयस्ते यदा छवन्नियोगे कृतकुगागमास्ते बिल्वकादयः ॥ ३६ ॥

सप्तमोऽध्यायः ।

१७७ स्नात्व्यादयश्च ७ । १ । ४९ ॥ स्नात्वी पीत्वी ॥ इति स्नात्व्यादिः ॥ आकृतिगणः ॥ १ ॥

१३० द्वारादीनां च ७ । ३ । ४ ॥ द्वार स्वर स्वाध्याय व्यल्कश स्वस्ति स्वर स्फ्यकृत् स्वादु मृदु श्वस् श्वन् स्व ॥ इति द्वारादिः ॥ २ ॥

१४० स्वागतादीनां च ७ । ३ । ७ ॥ स्वागत स्वध्वर स्वङ्ग व्यङ्ग व्यड व्यवहार स्वपति ॥ इति स्वागतादिः ॥ ३ ॥

१३३ अनुशतिकादीनां च ७ । ३ । २० ॥ अनुशतिक अनुहोड अनुसंवरण (अनुसंचरण) अनुसंवत्सर अङ्गारवेणु असिहत्य अस्यहत्य अस्यहेति वघ्योग पुष्करसद् अनुहरत् कुरुकत कुरुपञ्चाल उदकशुद्ध इहलोक परलोक सर्वलोक सर्वपुरुष सर्वभूमि मयोग परस्त्रि । राजपुरुषात्यग्नि । सूत्रनड ॥ इत्यनुशतिकादिः ॥ आकृतिगणोऽयम् ॥ तेन अभिगम अधिभूत अधिदेव चतुर्विद्या।इत्यादि ॥ ४ ॥

४७ * क्षिपकादीनां चोपसंख्यानम् ७ । ३ । ४५ ॥ * क्षिपका धुवका चरका सेतका करका चटका अवका हलका अलका कन्यका ध्रुवका एडका ॥ इति क्षिपकादिः ॥ आकृतिगणः ॥ ५ ॥

१०४ न्यङ्क्वादीनां च ७ । ३ । ५३ ॥ न्यङ्कु मद्गु भृगु दूरेपाक फलेपाक क्षणेपाक दूरेपाका फलेपाका दूरेपाकु फलेपाकु तक्र (तत्र) वक्र (चक्र) व्यतिषङ्ग अनुषङ्ग अवसर्ग उपसर्ग श्वपाक मांसपाक (मासपाक) मूलपाक कपोतपाक उलूकपाक । संज्ञायां मेघनिदाघावपाघार्घाः । न्यग्रोध विरुत ॥ इति न्यङ्क्वादिः ॥ ६॥

६१ * कणादीनां चेति वक्तव्यम् ७ । ४ । ३ ॥ कण रण भण श्रण लुप हेठ ह्वायि वाणि लोटि (लोठि) लोपि ॥ इति कणादिः ॥ ७ ॥

अष्टमोऽध्यायः ।

२१० तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ८ । १ । २७ ॥ गोत्र ब्रुव प्रवचन प्रहसन प्रकथन प्रत्ययन प्रपञ्च प्राय न्याय प्रचक्षण विचक्षण अवचक्षण स्वाध्याय भूयिष्ठ वानाम ॥ इति गोत्रादिः ॥ १ ॥

२१३ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ८ । १ । ६७ ॥ काष्ठ दारुण अमतापुत्र वेश अनाज्ञात अनुज्ञात अपुत्र अयुत अद्भुत अनुक्त भृश घोर सुख परम सु अति ॥ इति काष्ठादिः ॥ २ ॥

१६३ माडुपधायाश्च मतोर्वोऽयवादिभ्यः ८ । २ । ९ ॥ यव दाल्भि ऊर्मि (उर्मि) भूमि कृमि क्रुञ्चा वशा द्राक्षा ध्राक्षा ध्वजि व्रजि ध्वजि निजि सिजि सञ्जि हरिव् ककुद् मरुद् गरुद् इक्षु द्रु मधु ॥ इति यवादिः ॥ आकृतिगणः ॥ ३ ॥

१४ * अहरादीनां पत्यादिषूपसंख्यानम् * ८ । २ । ७० ॥

१ अहर् गीर् धूर् ॥ **इत्यहरादिः ॥ ४ ॥**

२ पति गण पुत्र ॥ **इति पत्यादिः ॥ ५ ॥**

१२ कस्कादिषु च ८ । ३ ।४८॥ कस्कः कौतस्कुतः भ्रातुष्पुत्रः शुनस्कर्णः सद्यस्कालः सद्यस्कीः साद्यस्कः कांस्कान् सर्पिष्कुण्डिका धनुष्कपालम् बहिष्पलम् (बर्हिष्पलम्) यजुष्पात्रम् अयस्कान्तः तमस्काण्डः अयस्काण्डः मेदस्पिण्डः भास्करः अहस्करः ॥ **इति कस्कादिः ॥ आकृतिगणः ॥ ६ ॥**

१०० सुषामादिषु च ८ । ३ । ९८ ॥ सुषामा निःषामा दुःषामा सुषेधः निषेधः निःषेधः दुःषेधः सुषंधिः निःषंधिः दुःषंधिः सुष्ठु दुष्ठु । गौरिषक्थः संज्ञायाम् । प्रतिष्णिका जलाषाहम् (जलाषाडम्) नौषेचनम् दुन्दुभिषेवणम् (दुन्दुभिषेचणम्) । एति संज्ञायामगात् । नक्षत्राद्धा । हरिषेणः रोहिणीषेणः ॥ **इति सुषामादिः ॥ आकृतिगणः ॥ ७ ॥**

१३३ न रपरसृपिसृजिस्पृहिसवनादीनाम् ।८ ।३।११०॥ सवने सवने । सूते सूते । सोमे सोमे । सवनमुखे सवनमुखे । किंसं किंसम् (किंसः किंसः) । अनुसवनमनुसवनम् । गोसनिं गोसनिम् । अश्वसनिमश्वसनिम् ॥ **पाठान्तरम् ॥** सवनेसवने । सवनमुखे सवनमुखे । अनुसवनमनुसवनम् । संज्ञायां बृहस्पतिसवः । शकुनिसवनम् । सोमे सोमे । सुते सुते । संवत्सरे संवत्सरे । विसं विसम् । किसं किसम् । मुसलं मुसलम् । गोसनिम् अश्वसंनिम् ॥ **इति सवनादिः ॥ ८ ॥**

१०३ * इरिकादिभ्यः प्रतिषेधो वक्तव्यः * ८ । ५ । ६ ॥ इरिका मिरिका तिमिरा ॥ **इतीरिकादिः । आकृतिगणः ॥ ९ ॥**

१०३ * गिरिनद्यादीनां च ॥ ८ । ४ ।१०॥ गिरिनदी गिरिनख गिरिनद्ध । **आकृ०** । गिरिनितम्ब चक्रनदी चक्रनितम्ब तूर्यमान माषोन आर्गयन ॥ **इति गिरिनद्यादिः ॥ १० ॥**

७८ क्षुभ्नादिषु च८ । ४ ।३९॥ क्षुभ्न नृनमन नन्दिन् नन्दन नगर । एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति । हरिनन्दी हरिनन्दनः गिरिनगरम् । नृतिर्यङि प्रयोजयन्ति । नरीनृत्यते । नर्तन गहन नन्दन निवेश निवास अग्नि अनूप । एतान्युत्तरपदानि प्रयोजयन्ति । परिनर्तनम् परिगहनम् परिनन्दनम् शरनिवेशःशरनिवासःशराग्निः दर्भानूपः । आचार्यादणत्वं च ॥ **आकृतिगणोऽयम् ॥ पाठान्तरम् ॥** क्षुभ्ना तृष्नु नृनमन नरनगर नन्दन । यङ्नृती । गिरिनदी गृहगमन निवेश निवास अग्नि अनूप आचार्यभोगीन चतुर्हायन । इरिकादीनि वनोत्तरपदानि संज्ञायाम् । इरिका तिमिर समीर कुवेर हरि कर्मार ॥ **इति क्षुभ्नादिः ॥ ११ ॥**

इति श्रीपाणिनिमुनिप्रणीतो गणपाठः समाप्तः ॥

धातुपाठः ।

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ १ ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥ २ ॥

भ्वादिगणः ।

१ भू सत्तायाम् ॥ **उदात्तः परस्मैभाषः ॥** २ एध वृद्धौ । ३ स्पर्ध संघर्षे । ४ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च । ५ बाधृ लोडने । ६ नाथृ ७ नाधृ याच्ञोपतापैश्वर्याशीःषु । ८ दध धारणे । ९ स्कुदि आप्रवणे । १० श्विदि श्वैत्ये । ११ वदि अभिवादनस्तुत्योः ॥ १२ भदि कल्याणे सुखे च । १३ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । १४ स्पदि किंचिच्चलने । १५ क्ष्विदि परिदेवने । १६ मुद हर्षे । १७ दद दाने । १८ ष्वद १९ स्वर्द आस्वादने । २० उर्द माने क्रीडायां च । २१ कुर्द २२ खुर्द २३ गुर्द २४ गुद क्रीडायामेव । २५ षूद क्षरणे । २६ ह्राद अव्यक्ते शब्दे । २७ ह्लादी सुखे च । २८ स्वाद आस्वादने । २९ पर्द कुत्सिते शब्दे ।३० यती प्रयत्ने । ३१युतृ ३२ जुतृ भासने । ३३ विथृ ३४ वेथृ याचने । ३५ श्रथि शैथिल्ये । ३६ ग्रथि कौटिल्ये । ३७ कत्थ श्लाघायाम् ॥ **एधादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥** ३८ अत सातत्यगमने । ३९ चिती संज्ञाने । ४० च्युतिर् आसेचने । ४१ श्च्युतिर् क्षरणे । ४२ मन्थ विलोडने । ४३ कुथि ४४ पुथि ४५ लुथि ४६ मथि हिंसासंक्लेशनयोः । ४७ षिध गत्याम् । ४८ षिधू शास्त्रे माङ्गल्ये च । ४९ खादृ भक्षणे । ५० खद स्थैर्ये हिंसायां च । ५१ बद स्थैर्ये । ५२ गद व्यक्तायां वाचि । ५३ रद विलेखने । ५४ णद अव्यक्ते शब्दे । ५५ अर्द गतौ याचने च । ५६ नर्द ५७ गर्द शब्दे । ५८ तर्द हिंसायाम् । ५९ कर्द कुत्सिते शब्दे । ६० खर्द दन्दशूके । ६१ अति ६२ अदि बन्धने । ६३ इदि परमैश्वर्ये । ६४ विदि अवयवे ॥ भिदि इत्येके ॥ ६५ गडि वदनैकदेशे । ६६ णिदि कुत्सायाम् । ६७ टुनदि समृद्धौ । ६८ चदि आह्लादे । ६९ त्रदि चेष्टायाम् । ७० कदि ७१ क्रदि ७२ क्लदि आह्वाने रोदने च । ७३ क्ष्विदि परिदेवने । ७४ शुन्ध शुद्धौ ॥ **अतादय उदात्ता उदात्तेतः परस्मैभाषाः ॥** ७५ शीकृ सेचने । ७६ लोकृ दर्शने । ७७ श्लोकृ संघाते । ७८ द्रेकृ ७९ ध्रेकृ शब्दोत्साहयोः । ८० रेकृ शङ्कायाम् । ८१ सेकृ ८२ स्रेकृ ८३ स्रकि ८४ श्रकि ८५ श्लकि गतौ । ८६ शकि शङ्कायाम् । ८७ अकि लक्षणे । ८८ वकि कौटिल्ये । ८९ मकि मण्डने । ९० कक लौल्ये । ९१ कुक ९२ वृक आदाने । ९३ चक तृप्तौ प्रतिघाते च । ९४ ककि ९५ वकि ९६ श्वकि ९७ चकि ९८ ढौकृ ९९ त्रौकृ १०० ष्वष्क १०१ वस्क १०२ मस्क १०३ टिकृ १०४

